॥ श्रीः ॥

श्रीमते हयग्रीवाय नमः

श्रीमते रामानुजाय नमः

# काव्यकलापः

## द्वितीयभागः

जग्गुशिङ्गरार्यविरचितः

Published with the financial assistance from the
Ministry of the Human Resource Development
Government of India

1989

FIRST EDITION 1989

*All rights reserved*

*Copies can be had of:*

JAGGU FAMILY

10th Cross, Someshwara Extension

TUMKUR-572 102

AND

Smt. YADUGIRI

No. 4, First Cross, Grape Garden,

Third Block, Thyagaraja Nagar, Bangalore-560028

**Price: Rs. 12/-**
**Rupees Twelve**

Printed by D. S. Krishnachar at Prabha Printing House,
22-A, Dr. D. V. Gundappa Road, Basavanagudi, Bangalore-4

# भूमिका—स्वस्तिवचनम्

श्रीरङ्गे शोभते यस्य श्रीरङ्गे शोभते च यः।
नमोऽहं कलये तस्मै न मोहं कलये ततः॥

"स्तव्यः स्तवप्रियः स्तोत्रम्" इति सत्यसाक्षात्कारसंपन्नेन सत्यवचसा सतामग्रगण्येन योगीन्द्रेण शान्तनवेन प्रमाणितः पुरुषोत्तम एव स्तोत्रस्य परमं पात्रम्। कुत इति चेत्—'गुणिनिष्ठगुणाभिधानं स्तुतिः' इति स्तुतिलक्षणं प्रसिद्धम्। गुणिनिष्ठानां कल्याणतमानां गुणानां निधिस्तु "यः सर्वज्ञः सर्ववित्", "सत्यकामः सत्यसङ्कल्पः", "तमीश्वराणां परमं महेश्वरम्" इत्यादिश्रुतिवाणीभिर्वर्णितः स एव। तद्वर्णनेनैव गुणाभिधायिन्याः स्तोत्रसरस्वत्याः चरितार्थता। तत एव परमपुरुषार्थस्य परिपूर्णो लाभः। तथापि अधन्याः कवयः तं नारायणं विस्मृत्य अल्पेश्वरान् अल्पास्थिरफलप्रदातॄन् अव्यस्थितचित्तवृत्तीन्नरानेव स्वीयकाव्येषु स्तुवन्ति। भगवद्विषयककाव्यप्रबन्धनिर्मातारः सुकृतिन एव प्रशस्ताः स्वात्मोद्धारं लोकोद्धारं च साधयितुं समर्थाः। तादृशसुकृतिनां मध्ये परिगणनीयाः अधुनातनकालिककविवरेण्याः श्रीमन्तः जग्गुशिंगरार्याः। तत्रभवतां काव्यकलापकुसुममालायाः द्वितीयं पुष्पमिदानीं मुद्रितं भवतीति महान्प्रमोदः सुरभारतीभक्तानां भगवद्भक्तानां च सज्जनानाम्।

अस्मिन् श्रीकोशे अत्यधिकैः स्तुतिमुक्ताफलैः पुरुषोत्तम एव साक्षात् आराधितः। कैश्चित् स्तवकुसुमैः तद्विभातिभूता देवताः गुरवश्च समार्चिताः। अन्यैः स्तवरत्नैः ऋतुवत्सरविद्याविततप्रभृतयः संभाविताः। एभिरपि वेदान्तशास्त्रप्रसिद्धया "अपर्यवसानवृत्त्या" अच्युत एव अर्च्यत इति वयं मन्यामहे। संमार्जनीदर्पणविषयकस्तुती नितरां नवीने रमणीये च। काव्यसरस्वत्याः शरीरे यथास्थानं निवेशिताः शब्दार्थालङ्काराः "अलङ्कारप्रियो

विष्णुः" इत्युपश्लोकितं वरणीयं वासुदेवं प्रीणयन्ति। तादृशालङ्काररहितापि सुमधुरपदविन्यासा सुवृत्ता रसनिर्भरा कविताकन्यका पुरुषोत्तमेन प्रतिगृह्यत एव। अन्याश्च कविचमत्कृतयः भगवदुपायनीभूताः कृतकृत्यतां याताः।

परमपदनिवासिभ्यः एभ्यः कविपुङ्गवेभ्यः नमांसि भूयांसि। श्रद्धाभक्तिप्रवणेन चेतसा ग्रन्थरत्नमिदं प्रकाशितवतां सुन्दराक्षरैः मुद्रितवतां बन्धूनां सुहृदां सहृदयानां च सेवां श्रीपतिः स्वीकृत्यताननुगृह्णातु इति स्वस्ति।

बेंगलूरुनगरे कार्तिककृष्णैकादश्याम्
सोमवासरे 5–12–1988

वरददेशिकाचार्यरङ्गप्रियः

श्रीः

श्रीमते रामानुजाय नमः

# प्रास्ताविकम्

महाकवेः 'प्रश्नविद्याविचक्षण' इति बिरुदभाजः परमपदवासिनः जग्गुश्री शिंगरार्यस्य काव्यकलापः द्वितीयभागः तद्बन्धूनां यत्नेन नितरां प्रकाशितः इति तुष्यामि। खण्डपत्रेषु पुस्तकेषु च लिखितानां श्लोकानां संग्रहणं कर्तुं तत्रभवता ग्रन्थकर्त्रैव पूर्वमेव आदिष्टोहं, इदानीं कञ्चित्कालान्तरं प्रकाशयितुं संतुष्ये। काव्यकलापस्य तृतीयोऽपि भागः प्रकाशनीयः अवशिष्यते एव। नाल्वडिकृष्णराजकृत कर्णाटराज्यसमृद्धियत्नसफलता प्रबन्धः, समस्यापूर्तयः भाषान्तरकविताश्च सन्ति। तत्सर्वं संकलय्य यथावसरं प्रकाशयितुं यत्नः सहृदयैः बन्धुभिः करिष्यते इति आशासे। तस्यायं शताब्दपूर्तिसंस्मरणाय कल्पताम्।

अस्मिन् काव्यकलापस्य द्वितीयभागे प्रमादवशात् पुराणागमस्थाः (पुरणागत) श्री कृष्णजयन्ती क्षीरार्घ्यमंत्राः तथा ग्रंथकर्तृपितामहस्य श्री जग्गु प्रथमशिंगरार्यस्य महाकवेः वेदपादस्तवाढ्यः प्रबन्धश्च मध्ये सम्पतितः प्रामाणिकैः विज्ञेय एव।

ग्रन्थस्यास्य परिशीलनेन स्वसहृदयतां पाठकेष्वपि संक्रामयितुं समर्थेन महाभागेन श्रीमता अस्मद्गुरुणा वरदेशिकाचार्यरङ्गप्रियेण अनुगृहीतां भूमिकां च दर्शंदर्शं कृतज्ञतां सप्रणामं अस्मै समर्पयामि॥

**इति अरैयर् श्रीरामशर्मा रामानुजदासः**
उभयन्यायवेदान्तालंकारः, राष्ट्रभाषाविशारदः
कन्नड पण्डितः मेलुकोटे
10–12–1988

## FOREWORD

Our Revered father Sri Jaggu Singra Iyengar has rendered yeoman service to Sanskrit literature. He dedicated his whole life for the development of Sanskrit. Though he had financial problems, with great difficulty he saw that his books were published. He longed very much for the publication of his remaining works.

We, the children of Sree Jaggu Singra Iyengar have great pleasure in fulfilling his last desire by bringing out his writings in the form of this book Kavya Kalapa II.

In this connection we take the opportunity to thank the following members who have extended their full co-operation in bringing the book to this form. We owe a deep debt of gratitude to Sri Varada Deshikacharya Rangapriya, a renowned Sanskrit Scholar who has been kind enough to write the preface to this book.

We offer our grateful thanks to Vidwan Areyar Shri Rama Sharma who offered helpful suggestions while publishing this book. We express our deep gratitude to Vidwan Shelvapillai Sharma, Retired Sanskrit Adhyapaka for writing some of the manuscripts in Devanāgari Lipi and proof correction with meticulous care. We also thank Sri A. Vasudevaballala and Sri T. V. Lakshmana Rao for their useful service.

We are extremely grateful to the Ministry of Human Resources Development, Govt. of India, for the financial aid.

The book in this form would not have been possible without the co-operation of Sri D. S. Krishnachar of Prabha Printing House.

**Son and Daughters of**
**Sri Jaggu Singra Iyengar**

January 1989

# अनुक्रमाणिका


| विषयः | | पृष्ठः |
|---|---|---|
| 1. हयग्रीवस्तुतिः | .... | 1 |
| 2. भूवराहस्तुतिः | .... | 2 |
| 3. श्रीनृसिंहस्तुतिः | .... | 3 |
| 4. कवाटनृसिंहस्तुतिः | .... | 4 |
| 5. श्रीनरसिंहमङ्गलाशासनम् | .... | 4 |
| 6. वामनस्तुतिः | .... | 6 |
| 7. विविधविषयकाः | .... | 6 |
| 8. भगवदनुसन्धानम् | .... | 6 |
| 9. चित्तं प्रति | .... | 7 |
| 10. श्रीरामचंद्रभगवान् | .... | 7 |
| 11. भगवति विस्रम्भः | .... | 8 |
| 12. गीतम् | .... | 9 |
| 13. श्रीरामचन्द्रमङ्गलाशासनम् | .... | 10 |
| 14. श्रीपद्मावत्यष्टोत्तरशतनामावलिः | .... | 12 |
| 15. श्रीराघवेन्द्रगुरवे नमः | .... | 14 |
| 16. ममान्तरङ्गनाथो मां रङ्गनाथोऽभिरक्षतु | .... | 15 |
| 17. भजे वेङ्कटेशं श्रये श्रीनिवासम् | .... | 17 |
| 18. अष्टलक्ष्मीस्तुतिः | .... | 19 |
| 19. पाञ्चजन्यस्तुतिपञ्चकम् | .... | 21 |
| 20. स्वामिन् प्रसीद भगवन् यदुशैलनाथ | .... | 22 |
| 21. श्रीरामनाममहिमा | .... | 25 |
| 22. शबरीभक्तिभावः | .... | 27 |

| विषयः | | पृष्ठः |
|---|---|---|


| | | |
|---|---|---|
| 23. श्रीकृष्णलीला | .... | 28 |
| 24. श्रीकृष्णकौमारलीला | .... | 30 |
| 25. श्रीकृष्णस्य सर्वोत्कृष्टत्वम् | .... | 31 |
| 26. पूतनामा | .... | 33 |
| 27. भगवद्विषयकश्लोकाः | .... | 33 |
| 28. प्रार्थना | .... | 35 |
| 29. भगवत्समाश्रयणम् | .... | 35 |
| 30. देवाधीनं जगत्सर्वम् | .... | 35 |
| 31. श्रीरामसुप्रभातम् | .... | 36 |
| 32. अवतारपञ्चकम् | .... | 36 |
| 33. आर्ति स्फूर्तिः | .... | 37 |
| 34. भक्तिद्वयी | .... | 38 |
| 35. द्रौपदीमानसंरक्षणम् | .... | 38 |
| 36. श्रीकृष्णार्घ्यमन्त्रः | .... | 38 |
| 37. श्रीदेवराजगिरिस्थित श्रीमन्नृसिंहसुप्रभातम् | .... | 39 |
| 38. राघवेन्द्रगुरुवर्यस्तोत्रम् | .... | 41 |
| 39. वेदपादस्तवः | .... | 44 |
| 40. वेदवेदान्त बोधिनी प्रशस्तिः | .... | 46 |
| 41. गरुडस्तुतिः | .... | 47 |
| 42. वन्दे तां परदेवताम् | .... | 48 |
| 43. सप्तविभक्तिकः श्लोकः | .... | 48 |
| 44. भगवन्महिमा | .... | 49 |
| 45. भगवति प्रार्थना | .... | 50 |
| 46. अपूर्वे सन्देशः | .... | 51 |
| 47. सूर्योपासनम् | .... | 51 |

| विषयः | | पृष्ठः |
|---|---|---|
| 48. भवानी स्तोत्रम् | .... | 52 |
| 49. श्रीगणपतिस्तुतिः | .... | 52 |
| 50. श्रीस्कन्दस्तवः | .... | 53 |
| 51. श्रीपुरन्दरदासः | .... | 54 |
| 52. ज्ञानसुधाबिन्दुः | .... | 54 |
| 53. चरमाभिसन्धिः | .... | 56 |
| 54. मानवमानः | .... | 57 |
| 55. नरस्वतंत्रस्स्वतएवनिर्घृणः | .... | 58 |
| 56. कलिकालकालः | .... | 59 |
| 57. दारिद्र्यमहिमा | .... | 60 |
| 58. दारिद्र्यवर्णनम् | .... | 61 |
| 59. सदसज्जनस्वभावः | .... | 62 |
| 60. सत्पुरुषक्रोधः | .... | 63 |
| 61. गीताजयन्ती | .... | 63 |
| 62. सुभाषितबिन्दवः | .... | 64 |
| 63. सर्वस्सर्वं नैव शक्नोति कर्तुम् | .... | 65 |
| 64. महाकविः | .... | 65 |
| 65. भवभूतिः | .... | 65 |
| 66. दर्पणदशकम् | .... | 66 |
| 67. संमार्जनीस्तुतिः | .... | 67 |
| 68. चटककुटीरम् | .... | 71 |
| 69. दीपावलीमहोत्सवः | .... | 71 |
| 70. निद्रास्तु भद्राय नः | .... | 71 |
| 71. वित्तवृत्तम् | .... | 72 |
| 72. वसन्तर्तुवर्णनम् | .... | 72 |

| विषयः | | पृष्ठः |
|---|---|---|
| 73. नवसंवत्सरः | .... | 73 |
| 74. द्विजमहिमा | .... | 73 |
| 75. कविताहृदयम् | .... | 74 |
| 76. समासनामाङ्कित श्लोकद्वयी | .... | 75 |
| 77. कविकाङ्क्षा | .... | 75 |
| 78. सत्काव्यमहत्त्वम् | .... | 76 |
| 79. तदा तदा समुत्पन्नं प्रक्षिप्तपद्यजातम् | .... | 77 |
| 80. श्रीबृहत्प्रस्थपुरीप्रसन्नलक्ष्मीवेङ्कटेशमाहात्म्यम् | .... | 79 |
| 81. सुभाषितानि | .... | 87 |
| 82. जगद्गुरुशङ्करार्यकवि प्रशस्तयः | .... | 95 |

## A BRIEF SKETCH OF THE LIFE HISTORY OF SRI JAGGU SINGRA IYENGAR

*Bāladhanvi Kulabhushana* **Sri Jaggu Singra Iyengar** had the honour of titles like "Abhinava Bhavabhuthi, Nuthana Kalidasa, Samskrita Jeevathu Chathura, Sura Saraswathi Rasika, Prathnavidya Vichakshana, Samskritha Vangmaya Kamadhenu".

Jaggu Singra Iyengar hails from the renowned Jaggu family, the predecessors of which family were respected as holy since they led pious life, the fame of which marks the footsteps for further generations.

In an attempt to trace the life history of our father Jaggu Singra Iyengar, one finds ourselves in the position of a tortoise in a well describing the depth of the ocean. It is widely known that he is a Gem among Scholars, pious among the religious and an ardent devotee among the devout. Records and writings by himself and others have helped us to build up a brief sketch.

The Jaggu family, since four or five generations, had settled at Yadavagiri popularly known as Melkote which is called Dakshina Badari, Bhuvaikunta in the puranic history. They were leading their life with devotion to Lord Sri Cheluvanarayana. This Deity was installed at Melkote by the Great Srivaishnava Guru Sri Ramanujacharya. Each one of this family was a Sanskrit scholar by himself.

Jaggu Singra Iyengar's grandfather was a vidwan in Sanskrit and a devotee of Lord Sri Hayagreeva. His Sanskrit work, "Satika Vritta Muktavali" has been published.

Jaggu's uncle Sri Venkatacharya was the court-poet during Wodeyars of Mysore. He had many titles,— " Baladhanvikula Koustubha ", " Sahitya Rathna ", "Āsthana Vidwan", "Sānkhya Theertha", "Shastrakavi Rathna ", " Sahithyalankara ", " Sānkhya Yoga Vedantha Vidwan ".

The parents of Jaggu Singra Iyengar, Sri Thirunarayana Iyengar and Chingamma were known for honesty, piety and charity. Jaggu was born to such parents on 20-10-1891 at Melkote. He was named Singa or Simha, bold and prestigious as a lion as he was.

Jaggus were poor but led a contented life with a feeling that whatever they had was plenty and they were ardent devotees of God.

As a child Jaggu Singra Iyengar learnt Sanskrit Amarakosha and Sanskrit verses with great interest. His uncle Asthana Vidwan Jaggu Venkatacharya was his Guru and Guide. Sri Ealpillai Varadachar also taught him Sanskrit. He joined a Kannada school and studied upto Middle school course. Then he learnt Sanskrit again becoming a regular student at Sanskrit Mahapatashala at Melkote. He earned Certificates taking up Sahityalankara and Kavya examinations.

He had great respect for his Gurus and with their blessings he became a poet even as he was a student. He used to please his teachers with his excellent compositions in Sanskrit.

Thus in the atmosphere of a highly cultured family, and in the company of learned men and in the midst of people who loved God, Jaggu's childhood was spent with happiness, earning the treasure of knowledge.

The boy's face shone brightly with the vigour of learning. He grew bold, brilliant and healthy at Melkote in the lap of nature in the midst of hills, pools and greens. His growth was shooting beyond his age, moulded in Indian Culture, visiting Gurumaṭas and Temples.

After his school days at Melkote, Jaggu joined Mysore Maharaja's Sanskrit College and passed in distinction with a First Class in Nataka and Sahitya examinations.

He had a strong desire to tour the places of India and thus after his education he visited Hyderabad, Vanaparthi, Gadwal. He got married at the age of 24. His wife Vengadamma was a girl of very good nature and noble qualities.

Without a job and because of poverty, Jaggu's urge to take up All India tour induced him to go from Kanyakumari to Kashmir. He left the house without a pie but earned sufficiently wherever he went by dint of his merit and scholarly discourse. Thus at the Court Hall of Diwan Bahadur of Lahore, he presented a scholarly work which was highly appreciated by the Diwan Bahadur who honoured Jaggu with Rs. 2,000/- of those days. Even today one can see the photo of Jaggu with Diwan Bahadur preserved in his own house in memory of his visit to Lahore. He stayed at Ayodhya for three months worshipping Lord Sri Rama composing prayers in praise

of God. He was highly respected by the people of the locality who addressed him as " Bāvāji ".

He went to Madras in 1914 and took up research work of Sanskrit books in the Adyar Library. He came in contact with Annie Besant there who helped and encouraged him in the research work and thus his stay at Madras was for six months.

As he received an order appointing him as the Sanskrit pandit, he returned to Karnataka and served in the Education Department upto his retirement.

**WORKS OF SRI JAGGU SINGRA IYENGAR**

Jaggu was a lover of Sanskrit from childhood. He had unbounded enthusiasm in composing Sanskrit works. He is the author of many great Sanskrit works :—

1. His first work in Sanskrit is "Yadu Shaila Champu"—about Yadavagiri. It is Shatprapancha Kavya published in 1932.

2. Sri Krishnakatha Rahasya—Sanskrit stanzas written in Telugu and Kannada script. The book was prescribed for S.S.L.C. during 1941–42 published in 1936. It contains Summary also.

3. Dāsharathi Charitam—Yamaka Kāvya published in 1958.

4. Venkatesapadāvalamba — Sanskrit Stanzas with Kannada summary.

5. Kāvya Kalāpa :—Thatah kim, Bhaja Lakshmisham, Madhurāshtakam, are the Kavyas. It also contains dramas— Yaksha Prashna, Dharma Vyādha Darshana.

6. Shibi Vaibhavam :—Drama published in Pratibha Sanskrit Magazine.

7. Shouri Shouryam – Drama : — "Sura Bhārati Prakashana of Bangalore published it and it was released on a special occasion by His Highness the Governor of Karnataka Sri Govind Narayan.

8. Athimānushastava :—Kannada poems from the Sanskrit Original work. Written in Bhamini Shatpadi with summary in Kannada. Published in 1975.

His Kannada works are Neethi Sārāvali, Baralina Bhagya, Vairamudi Vaibhava. To the Sanskrit Daily "Sudharma Pathrika" Kāvyas, Kathanas and Commentaries were his regular contributions.

**HIS HONOURS AND AWARDS**

1. His Highness the Maharaja of Mysore Sri Krishna Raja Wodeyar IV was in high praise of Jaggu's Sanskrit Works and awarded him with money and a costly Shawl.

2. Shringeri Swamiji was pleased with his impromptu talent. Sree Jaggu composed a poem on Sri Sharadamba on the spot. Swamiji honoured him with a Shawl and Rs. One hundred.

3. During 1955-56 Sri Jaggu Singra Iyengar was selected for Samskriti Prasara in Karnataka under the scheme of the Honourable Minister Sri K. Hanumanthaiah.

4. He got the State Award in 1979 for his scholarly works. He received the Honour by the Honourable Minister for Education Sri Subbaiah Shetty.

5. He received the title 'Prathnavidya Vichakshana' on 8-8-79 by Sri Vishwesha Theertha Sripadangal of Sri Pejavar Mutt.

6. The Karnataka State recognised the esteemed service of Jaggu in Sanskrit literature and sanctioned Rs. 500/- per month as Honorarium.

**His Participation in various Associations** as the President, as the Guest and as Delegate :

1. He presided over the Centenary Celebration of Sri Maharaja Sanskrit College of Mysore on 11-12-1976.

2. His Sanskrit Drama "Dharmavyādha" found broadcast over All India Radio, Dharwar.

3. The Sanskrit Session of Vishwa Parishat took place at Bombay in 1961. Sri Jaggu was one of the Chief Guests in the Session.

4. He participated in the Seminar of Sanskrit Poets in 1978 at Sri Siddaganga of Tumkur, in the grand Sammelan of Sanskrit.

**Moral Example** that Sri Jaggu Singra Iyengar has set for generations to come :

Respect for teachers, devotion to God, simple by nature, toleration towards any odds in life, kind hearted towards animals, lovers of nature.

He enjoyed good health throughout his life, the secret of which was due to the regular yoga-exercises, strict diet and disciplined life.

Sri Jaggu Singra Iyengar has painted a picture of Lord Sri Narasimha on the door of a big hall of his own House at Tumkur which he installed with devotion at the centre of the Hall and worshipped the Lord daily and he got the Darshan of God in his own House. The prayer he composed and wrote on the door is this.

अररे ! नृहरे, कस्मादररे त्वं प्रतिष्ठितः ?
स्तंभोद्भवस्य सान्निध्यं कवाटे युक्तमेव ते ॥

Punya Purusha as he was, he attained the lotus feet of God on Ekadashi day of Pushya Uttarayana Punyakala having the darshan of Parama Acharyas.

ಬಾಲಧನ್ವಿ ಕುಲಭೂಷಣರೂ, ಕವಿಕುಲ ತಿಲಕರೂ, ಅಭಿನವ ಭವಭೂತಿ,
ನೂತನ ಕಾಳಿದಾಸ, ಎಂದೆಲ್ಲಾ ಅನೇಕ ಪಂಡಿತರುಗಳಿಂದ ಹೊಗಳಿಸಿಕೊಂಡ
ಸಂಸ್ಕೃತ ಕವಿವರ್ಯರಾದ

# ಪೂಜ್ಯ ಶ್ರೀ ಜಗ್ಗು ಶಿಂಗರಾರ್ಯರ ಸಂಕ್ಷಿಪ್ತ ಜೀವನ ಚರಿತ್ರೆ

ಆವ ವಂಶಜರು ಶ್ರೀ ಹರಿಯ ಕೃಪೆಯಿಂ ಪೊತ್ತು
ಪಾವನರೆನಿಸಿ ಪವಿತ್ರ ಜೀವನವ ನಡೆಸಿಹರೋ
ಆವ ವಂಶದ ಕೀರ್ತಿ ಆಚಂದ್ರಾರ್ಕವೋ
ಆವ ವಂಶದ ಹಿರಿ ಗುಣಂಗಳು ಕಿರಿಯರಿಗೆ ಮಾರ್ಗ
ದರ್ಶನವೋ ಆ ಪವಿತ್ರ ಜಗ್ಗುವಂಶದ ಹಿರಿಯರಿಗೆ
ಶಿರಬಾಗಿ ನನ್ನಿಂದೆರಡು ನುಡಿಯ ನುಡಿಸಿರೆಂದು ಬೇಡುವೆನು.

ಅವರ ಹಿರಿಯ ಮಗಳು ಜಗ್ಗು ಪ್ರಿಯದರ್ಶಿನಿ

ದೈವಭಕ್ತರೂ, ಪಂಡಿತೋತ್ತಮರೂ, ಸಾತ್ವಿಕರೂ ಆದ ಜಗ್ಗು ವಂಶದವರ ಚರಿತ್ರೆಯನ್ನು ನಾನು ಬರೆಯಲು ಹೊರಟಿರುವುದು ಬಾವಿಯಲ್ಲಿರುವ ಕಪ್ಪೆ ಸಮುದ್ರದ ವಿಶಾಲತೆಯನ್ನು ತಿಳಿಸಲು ಹೊರಟಂತೆ ಆಗುತ್ತದೆ.

ಆದರೂ ನಮ್ಮ ತಂದೆಯವರಾದ ಜಗ್ಗು ಶಿಂಗ್ರೈಯ್ಯಂಗಾರ್ಯರಿಂದಲೇ ಕೇಳಿ ತಿಳಿದ, ಮತ್ತು ಅವರೇ ಬರೆದಿಟ್ಟಿರುವ ಜೀವನ ಚರಿತ್ರೆ ಲೇಖನದ ಆಧಾರದಿಂದಲೂ ಸಂಗ್ರಹಿಸಿ ಇಟ್ಟಿದ್ದ ಅನೇಕ ಅರ್ಹತಾ ಪತ್ರಗಳ ದಾಖಲೆಯಿಂದಲೂ, ಅವರ ಸಂಕ್ಷಿಪ್ತ ಜೀವನ ಚರಿತ್ರೆಯನ್ನು ಬರೆಯುತ್ತಿದ್ದೇನೆ.

ಕನ್ನಡ ನಾಡಿನಲ್ಲಿ ಭೂ ವೈಕುಂಠವೆಂದು ಪ್ರಸಿದ್ಧಿಯಾಗಿರುವ ಯಾದವಾದ್ರಿ, ಅಥವಾ ಮೇಲುಕೋಟೆ ಎಂಬ ಪುಣ್ಯಕ್ಷೇತ್ರದಲ್ಲಿ ಐದಾರು ತಲೆಮಾರುಗಳಿಂದಲೂ ಜಗ್ಗು ವಂಶದವರು ನೆಲೆಸಿದ್ದರು. ಶ್ರೀ ರಾಮಾನುಜಾಚಾರ್ಯರಿಂದ ಪ್ರತಿಷ್ಠಾನಗೈದ ಆ ಪುಣ್ಯಕ್ಷೇತ್ರದ ಚಲುವನಾರಾಯಣ ಸ್ವಾಮಿಯ ಭಕ್ತರಾಗಿ ಕೈಂಕರ್ಯನಿರತರಾಗಿದ್ದರು. ಇವರ ಪೂರ್ವಿಕರೆಲ್ಲಾ ಸಂಸ್ಕೃತ ವಿದ್ವಾಂಸರೂ ಸಾತ್ವಿಕರೂ ಆಗಿದ್ದರು.

ಜಗ್ಗು ಶಿಂಗ್ರೈಂಗಾರ್ಯರ ತಾತನವರ ಹೆಸರೂ ಜಗ್ಗು ಶಿಂಗ್ರೈಂಗಾರ್ಯರೇ. ಅವರು ದೊಡ್ಡ ಸಂಸ್ಕೃತ ವಿದ್ವಾಂಸರು, ಹಯಗ್ರೀವೋಪಾಸಕರು, ಅವರು ರಚಿಸಿರುವ " ಸಟೀಕಾ ವೃತ್ತ ಮುಕ್ತಾವಳೀ " ಎಂಬ ಸಂಸ್ಕೃತ ಗ್ರಂಥವು ಪ್ರಕಟವಾಗಿ ಪ್ರಚಾರವಾಗಿದೆ.

ಜಗ್ಗು ಶಿಂಗ್ರೈಂಗಾರ್ಯರ ತಂದೆಯವರು ಜಗ್ಗು ತಿರುನಾರಾಯಣೈಂಗಾರ್‌ರವರು ದೈವಭಕ್ತರು ಸಹಸ್ರನಾಮ ಸೇವೆಯಲ್ಲಿ ಪ್ರಸಿದ್ಧರಾದವರು, ತಾಯಿ ಸಾಧ್ವಿ ಶಿಂಗಮ್ಮನವರು.

ಇವರ ಹಿರಿಯ ಮಗನೇ ಜಗ್ಗು ಶಿಂಗ್ರೈಂಗಾರ್ಯರು, ತಾ|| 20-10-1891ರಲ್ಲಿ ಮೇಲುಕೋಟೆಯಲ್ಲಿ ಇವರ ಜನನವಾಯಿತು, ಇವರಿಗೆ ಇಬ್ಬರು ತಮ್ಮಂದಿರೂ ಒಬ್ಬ ತಂಗಿ.

ಜಗ್ಗುರವರ ಚಿಕ್ಕಪ್ಪಂದಿರೂ ಮತ್ತು ಇವರ ವಿದ್ಯಾಗುರುಗಳೂ ಆದ ಪೂಜ್ಯ ಜಗ್ಗು ವೆಂಕಟಾಚಾರ್ಯರು ಬಹಳ ಪ್ರಸಿದ್ಧರು. ಜ್ಞಾನಿಗಳೂ ಸಂಸ್ಕೃತ ವಿದ್ವಾಂಸರೂ ಆದ ಜಗ್ಗು ವೆಂಕಟಾಚಾರ್ಯರು " ಸುದರ್ಶನೋಪಾಸಕರು " ಇವರು ಅನೇಕ ಸಂಸ್ಕೃತ ಗ್ರಂಥಗಳನ್ನು ರಚಿಸಿ ಪ್ರಕಟಿಸಿದ್ದಾರೆ. ಇವರು ಅನೇಕ ಬಿರುದಾಂಕಿತರೂ ಮೈಸೂರು ರಾಜರ ಆಸ್ಥಾನ ವಿದ್ವಾಂಸರೂ ಆಗಿದ್ದರು. ಇವರ ಬಿರುದುಗಳು — ಬಾಲಧನ್ವಿಕುಲಕೌಸ್ತುಭ, ಸಾಹಿತ್ಯರತ್ನ, ಆಸ್ಥಾನ ವಿದ್ವಾನ್, ಶಾಸ್ತ್ರಕವಿರತ್ನ, ಸಾಹಿತ್ಯಾಲಂಕಾರ, ಸಾಂಖ್ಯಯೋಗ ವೇದಾಂತ ವಿದ್ವಾನ್, ಸಾಂಖ್ಯತೀರ್ಥ, ಇಳೈಯವಲ್ಲಿ, ಜಗ್ಗು ವೆಂಕಟಾಚಾರ್ಯರು ಎಂದು ಪ್ರಸಿದ್ಧರಾದವರು. ಜಗ್ಗು ವಂಶದವರಿಗೆ ಬಾಲಧನ್ವೀ ಕುಲದವರೆಂದು ಹೆಸರು.

ಇಂತಹ ಪ್ರಸಿದ್ಧ ವಂಶದಲ್ಲಿ ಜನಿಸಿದವರು ಜಗ್ಗು ಶಿಂಗ್ರೈಂಗಾರ್ಯರು, ಇವರ ಬಾಲ್ಯ ಒಟ್ಟು ಕುಟುಂಬದ ವಠಾರದಲ್ಲಿ ಬಂಧು-ಬಾಂಧವರೊಂದಿಗೆ ಬೆಳೆಯಿತು.

ಇವರ ವಿದ್ಯಾಭ್ಯಾಸ : ಬಾಲ್ಯದಲ್ಲಿ ಹಿರಿಯರಿಂದ ದೇವರ ಸ್ತೋತ್ರಗಳು ಸಂಸ್ಕೃತ ಅಮರಕೋಶ ಕಂಠಪಾಠ ನಂತರ ಕನ್ನಡ ಮಿಡಲ್ ಸ್ಕೂಲ್ ವಿದ್ಯಾರ್ಥಿ. ಸ್ವಸ್ಥಳ ಮೇಲುಕೋಟೆಯಲ್ಲಿಯೇ ಸಂಸ್ಕೃತ ಮಹಾಪಾಠಶಾಲೆಯಲ್ಲಿ 10ನೇ ವಯಸ್ಸಿನಿಂದ ವಿದ್ಯಾರ್ಥಿಯಾಗಿದ್ದು 6–7 ವರ್ಷಕಾಲ ವಿದ್ಯಾರ್ಜನೆ ಮಾಡಿ ಸಾಹಿತ್ಯಾಲಂಕಾರ, ಕಾವ್ಯ, ಪರೀಕ್ಷೆ ಮಾಡಿಕೊಂಡರು.

ಮೇಲುಕೋಟೆ ಪಾಠಶಾಲೆಯ ಇವರ ಗುರುಗಳು ಮಹಾ ವಿದ್ವಾಂಸರೂ ಸಂಸ್ಕೃತ ವಿದ್ಯಾನಿಧಿಯೂ ಆಗಿದ್ದ ಈಯಲ್ ಪಿಳ್ಳೆ ವರದಾಚಾರ್ಯರು, ಮತ್ತು ಸ್ವಂತ ಚಿಕ್ಕಪ್ಪಂದಿರಾದ, ಜಗ್ಗು ವೆಂಕಟಾಚಾರ್ಯರು, ಇವರು ಜಗ್ಗುರವರ ಗುರುಗಳೂ ಅಲ್ಲದೆ ಬಾಲ್ಯದಲ್ಲಿ ಅವರನ್ನು ತಿದ್ದಿ ಮಾರ್ಗದರ್ಶನ ಮಾಡಿದ ಆಚಾರ್ಯರೂ ಆಗಿರುತ್ತಾರೆ.

ಜಗ್ಗು ಅವರ ಮನೆತನ ಬಡತನಕ್ಕೂ ಪ್ರಸಿದ್ಧವಾದುದು. ಆದರೂ ಸಂತುಷ್ಟರೂ, ಆತ್ಮಾಭಿಮಾನವುಳ್ಳವರೂ ದೈವಭಕ್ತರೂ ಆಗಿದ್ದರು. ಜಗ್ಗು ಅವರು ಬಾಲ್ಯದಿಂದಲೂ ಬಡತನದ ಕಷ್ಟವನ್ನು ಕಂಡವರು.

ಜಗ್ಗು ಅವರಿಗೆ ತಮ್ಮ ಗುರುಗಳನ್ನು ಕಂಡರೆ ಪರಮಭಕ್ತಿ. ಗುರುಗಳಿಗೂ ಚುರುಕು ಬುದ್ಧಿಯ ಈ ಹುಡುಗನನ್ನು ಕಂಡರೆ ಪ್ರೀತಿ, ವಿದ್ಯಾರ್ಥಿ ದೆಸೆಯಲ್ಲಿಯೇ ಇವರು ಸಂಸ್ಕೃತ ಕವಿತೆಗಳನ್ನು ರಚಿಸಿ ಗುರುಗಳನ್ನು ಮೆಚ್ಚಿಸಿದ್ದರು.

ಹೀಗೆ ಇವರ ಬಾಲ್ಯ ಗುರುಮಠದ ಪ್ರಸಾದ, ದೇವರ ಸೇವೆ, ಸತ್ಸಹವಾಸ, ಸುಸಂಸ್ಕೃತಿಯ ಸಮೃದ್ಧಿಯ ಮಧ್ಯದಲ್ಲಿ ಬೆಳೆಯಿತು. ವಯಸ್ಸಿಗೆ ಮೀರಿದ ಬೆಳವಣಿಗೆ, ಧೀರೋದಾತ್ತ ಧೃಢಕಾಯನಾಗಿ ಬೆಳೆದ.

ಮೇಲುಕೋಟೆ ಪಾಠಶಾಲೆಯ ವಿದ್ಯಾಭ್ಯಾಸ ಮುಗಿದ ನಂತರ ಮೈಸೂರಿನ ಮಹಾರಾಜಾ ಮಹಾ ಸಂಸ್ಕೃತ ಕಾಲೇಜಿನಲ್ಲಿ ವಿದ್ಯಾಭ್ಯಾಸ ಮಾಡಿ, ನಾಟಕಾಂತ, ಸಾಹಿತ್ಯ ಪರೀಕ್ಷೆಗಳಲ್ಲಿ ಪ್ರಥಮ ದರ್ಜೆಯಲ್ಲಿ ಉತ್ತೀರ್ಣರಾದರು.

ಇಲ್ಲಿಯ ವಿದ್ಯಾಭ್ಯಾಸದ ನಂತರ ಊರಿನಲ್ಲಿ ಹಿರಿಯರ ಬಡತನದ ಕಷ್ಟ ನೋಡಿ ಸಹಿಸಲಾರದೇ ಊರೂರು ಸುತ್ತಿ ಪ್ರವಾಸ ಹೊರಟುಬಿಟ್ಟರು. ಹೈದರಾಬಾದ್, ವನಪರ್ತಿ, ಗದ್ವಾಲ್ ಈ ಪ್ರಾಂತಗಳಲ್ಲೆಲ್ಲಾ ಸುತ್ತಿಕೊಂಡು ಒಂದೆರಡು ವರ್ಷಕಾಲ ಕಳೆದು ಮತ್ತೆ ಸ್ವಂತ ಊರಿಗೆ ಬಂದರು.

ಇವರ 24–25ನೇ ವಯಸ್ಸಿನಲ್ಲಿ ಇವರ ವಿವಾಹವಾಯಿತು. ಪತ್ನಿ ಸಾಧ್ವಿ ಗುಣವತಿ ವೇಂಗಡಮ್ಮ. ಬಡತನ ಒಂದು ಕಡೆ–ದೇಶಾಟನೆ ಮಾಡಬೇಕೆಂಬ ಉತ್ಕಟೇಚ್ಛೆ ಒಂದು ಕಡೆ ಹೀಗಾಗಿ ಮತ್ತೆ ದೇಶಯಾತ್ರೆಗೆ ಮನೆಬಿಟ್ಟು ಹೋಟುಬಿಟ್ಟರು. ದಕ್ಷಿಣದಲ್ಲಿ ಕನ್ಯಾಕುಮಾರಿಯಿಂದ ಹಿಡಿದು ಉತ್ತರದಲ್ಲಿ ಕಾಶ್ಮೀರದವರೆಗೂ ಉದ್ದಗಲ ಪೂರ್ತಾ 3 ವರ್ಷಕಾಲ ಪರ್ಯಟನ. ಆ ಸಮಯದಲ್ಲಿ ಕೈಯಲ್ಲಿ ಬಿಡಿಕಾಸೂ ಇಲ್ಲದೆ ಹೊರಟವರು ಆಯಾ ಸ್ಥಳಗಳಲ್ಲಿ ಕೆಲ-ಕೆಲವು ದಿನ ತಂಗಿದವರು ತಮ್ಮ ವಿದ್ಯಾ ವಿದ್ವತ್ ಪ್ರತಿಭೆಯಿಂದ ಹಣ ಸಂಪಾದಿಸಿಕೊಂಡು ಮುಂದಿನ ಊರಿಗೆ ಪ್ರಯಾಣ ಮಾಡುತ್ತಿದ್ದರು.

ಲಾಹೋರಿಗೆ ಹೋದಾಗ ಅಲ್ಲಿಯ ದಿವಾನ್ ಬಹದ್ದೂರ್‌ರವರು ರಾಜ ಸಮ್ಮುಖ ದಲ್ಲಿ ವಿದ್ವತ್ ಸಭೆಯನ್ನು ಏರ್ಪಡಿಸಿದರಂತೆ ಜಗ್ಗುರವರ ತೇಜಸ್ಸು, ವಿದ್ವತ್ತಿಗೆ ಮೆಚ್ಚಿ ಆ ದಿವಾನರು ಆಗಿನ ಕಾಲದಲ್ಲಿಯೇ ಎರಡು ಸಾವಿರ ರೂ. ಬಹುಮಾನವನ್ನು ಕೊಟ್ಟರಂತೆ. ಆ ದಿವಾನರ ಫೋಟೋ ಇವತ್ತಿಗೂ ನಮ್ಮ ಮನೆಯಲ್ಲಿದೆ. ಅವರ ನೆನಪಿಗಾಗಿ ಕಟ್ಟು ಹಾಕಿಸಿ ಜೋಪಾನವಾಗಿ ಇಟ್ಟುಕೊಂಡಿದ್ದರು ನಮ್ಮ ತಂದೆ.

ನಂತರ ಅಯೋಧ್ಯೆಯಲ್ಲಿ ಮೂರು ತಿಂಗಳಿದ್ದು ಶ್ರೀರಾಮ ದೇವಸ್ಥಾನದ ಅರ್ಚಾ ಮೂರ್ತಿಯನ್ನು ಪೂಜಿಸುತ್ತಿದ್ದರಂತೆ. ಉತ್ತರ ದೇಶದಲ್ಲಿ ಜನರು ಇವರನ್ನು "ಬಾವಾಜಿ" ಎಂದು ಬಹಳ ಗೌರವಿಸುತ್ತಿದ್ದರಂತೆ.

ನಂತರ 1914–15ರಲ್ಲಿ ಮದ್ರಾಸ್ ಅಡೆಯಾರ್ ಲೈಬ್ರೆರಿಯಲ್ಲಿ ಸಂಸ್ಕೃತ ಗ್ರಂಥ ಶೋಧನಾ ಕಾರ್ಯವನ್ನು 6 ತಿಂಗಳ ಕಾಲ ಮಾಡಿದರು. ಅನಿಬೆಸೆಂಟ್‌ರವರು ಇವರನ್ನು ನಿಯಮಿಸಿ ಎಲ್ಲಾ ಸೌಕರ್ಯವನ್ನೂ ಒದಗಿಸಿದ್ದರು. ಜಗ್ಗುರವರಿಗೆ ಮದ್ರಾಸ್ ಹವ ಒಗ್ಗದೆ ಅನಾರೋಗ್ಯದಿಂದ ಮತ್ತೆ ಮೇಲುಕೋಟೆಗೆ ಹಿಂತಿರುಗಿದರು.

ಅದೇ ಸಮಯಕ್ಕೆ ಇವರಿಗೆ ಮಿಡಲ್‌ಸ್ಕೂಲಿನಲ್ಲಿ ಸಂಸ್ಕೃತ ಪಂಡಿತರಾಗಿ ಕೆಲಸಕ್ಕೆ ಆರ್ಡರ್ ಬಂದಿತು. 15 ರೂ. ಸಂಬಳಕ್ಕೆ ಸೇರಿದರಂತೆ, ನಂತರ ಕೆಲವುಕಾಲ ಹೈಸ್ಕೂಲಿನಲ್ಲಿಯೂ ಕೆಲಸ ಮಾಡಿ ನಿವೃತ್ತರಾದರು.

**ಇವರ ಕಾವ್ಯ ರಚನೆಗಳು ಮತ್ತು ಸನ್ಮಾನ ಪ್ರಶಸ್ತಿಗಳು :**

ಬಾಲ್ಯದಿಂದಲೂ ಸಂಸ್ಕೃತ ಭಾಷಾಪ್ರೇಮ, ಕಾವ್ಯರಚನೆಯಲ್ಲಿ ಆಸಕ್ತಿ, ಉತ್ಸಾಹ, ಇದ್ದುದರಿಂದ ಇವರು ಅನೇಕ ಸಂಸ್ಕೃತ ಕಾವ್ಯಗಳನ್ನು ರಚಿಸಿ ಸ್ವಂತ ಮುದ್ರಣ ಮಾಡಿಸಿದ ಮಹಾಕವಿ.

1. ಇವರ ಪ್ರಥಮ ಕಾವ್ಯ "ಯದು ಶೈಲ ಚಂಪೂ"—ಇದು ಯಾದವಗಿರಿ (ಮೇಲುಕೋಟೆ) ವಿಷಯವನ್ನು ಕುರಿತದ್ದು, ಷಟ್ಪ್ರಪಂಚವೆಂಬ ವಿಭಾಗವುಳ್ಳ ಕಾವ್ಯ. **ಪ್ರಕಟಣೆ** 1932.

2. "ಕೃಷ್ಣಕಥಾರಹಸ್ಯ"—ಸಂಸ್ಕೃತ ಕಾವ್ಯ ಕನ್ನಡ ಮತ್ತು ತೆಲುಗು ಅಕ್ಷರಗಳಲ್ಲಿ ತಾತ್ಪರ್ಯ ಸಮೇತ ಮುದ್ರಿತವಾಗಿದೆ. 1941–42ನೇ ಇಸವಿಯ S.S.L.C. ಪರೀಕ್ಷೆಗೆ ಪಠ್ಯಪುಸ್ತಕವಾಗಿ ಅಂಗೀಕೃತವಾಗಿದ್ದಿತು. ಪ್ರಕಟಣೆ 1936ರಲ್ಲಿ.

3. "ದಾಶರಥಿ ಚರಿತಂ"— ಸಂಸ್ಕೃತ ಕಾವ್ಯ ಇದು ಮೂರು ವಿಭಾಗಗಳಿಂದ ಕೂಡಿ ಸರಳ ಯಮಕ ಕಾವ್ಯ 1958ರಲ್ಲಿ ಪ್ರಕಟಣೆ.

4. "ವೆಂಕಟೇಶ ಪದಾವಲಂಬ ಸ್ತೋತ್ರ"—ಸಂಸ್ಕೃತ ಕಾವ್ಯ ಕನ್ನಡ ಟಿಪ್ಪಣಿ ಸಮೇತ ಮುದ್ರಿತವಾಗಿದೆ.

5. "ಕಾವ್ಯ ಕಲಾಪ"—ಇದರಲ್ಲಿ ತತಃ ಕಿಂ ಭಜಲಕ್ಷ್ಮೀಶಂ, ಮಧುರ ಸ್ತೋತ್ರ ಇತ್ಯಾದಿ ವಿಭಾಗಗಳೂ ಮತ್ತು ಯಕ್ಷಪ್ರಶ್ನ ಧರ್ಮವ್ಯಾಧ ದರ್ಶನ ಎಂಬ ನಾಟಕಗಳೂ ಇವೆ.

6. "ಶಿಬಿ ವೈಭವ"—ಎಂಬ ಸಂಸ್ಕೃತ ನಾಟಕವು "ಸಂಸ್ಕೃತ ಪ್ರತಿಭಾ" ಎಂಬ ಷಾಣ್ಮಾಸಿಕ ಸಂಚಿಕೆಯಲ್ಲಿ ಪ್ರಕಟವಾಗಿದೆ.

7. "ಶೌರಿಶೌರ್ಯ" ಎಂಬ ಸಂಸ್ಕೃತ ನಾಟಕವು ಬೆಂಗಳೂರಿನ ಸುರಭಾರತೀ ಪ್ರಕಾಶನಂ ಎಂಬ ಸಂಸ್ಥೆಯಿಂದ ಮುದ್ರಿತವಾಗಿ ಮೈಸೂರಿನ ರಾಜ್ಯಪಾಲರಾಗಿದ್ದ ಶ್ರೀ ಗೋವಿಂದ ನಾರಾಯಣರ ಅಮೃತ ಹಸ್ತದಿಂದ ಬಿಡುಗಡೆಯಾಯಿತು.

8. "ಅತಿಮಾನುಷಸ್ತವ" — ಶ್ರೀವತ್ಸ ಚಿಹ್ನರ ಪಂಚಸ್ತವಗಳಲ್ಲಿ ಒಂದಾದ ಅತಿಮಾನುಷಸ್ತವ ಸಂಸ್ಕೃತ ಶ್ಲೋಕಗಳನ್ನು ಕನ್ನಡದಲ್ಲಿ ಭಾಮಿನೀ ಷಟ್ಪದಿಯಲ್ಲಿ ಅನುವಾದಿಸಿ ಮಹತ್ತರವಾದ ಆ ಸ್ತೋತ್ರದ ಮಹಿಮೆಯನ್ನು ಕನ್ನಡ ರಸಿಕರಿಗೆ ಉಣಬಡಿಸಿದ್ದಾರೆ. ಮುದ್ರಣ – 1975ರಲ್ಲಿ, ಮುದ್ರಕರು ಆಳ್ವಾರ್ ಪ್ರಿಂಟರ್ಸ್, ಬೆಂಗಳೂರು.

ಇವಲ್ಲದೆ ಇವರು ಕನ್ನಡದಲ್ಲಿಯೂ ಕಾವ್ಯಗಳನ್ನು ರಚಿಸಿ ಪ್ರಕಟಿಸಿದ್ದಾರೆ. ನೀತಿ ಸಾರಾವಳಿ, ಬರಲಿನ ಭಾಗ್ಯ, ವೈರಮುಡೀ ವೈಭವ ಇನ್ನೂ ಮುಂತಾದುವು.

ಸಂಸ್ಕೃತ ಸುಧರ್ಮಾ ಪತ್ರಿಕೆಯಲ್ಲಿ ಸತತವಾಗಿ ಇವರ ಕಾವ್ಯ, ಕಥನ, ವಿಮರ್ಶೆ ಮುಂತಾಗಿ ಅನೇಕ ವಿಷಯಗಳು ಪ್ರಕಟವಾಗುತ್ತಲೇ ಇದ್ದುವು.

ಇದೀಗ ಮಕ್ಕಳಾದ ನಾವು ಅವರ ಅಪ್ರಕಟಿತ ಕಾವ್ಯಗಳನ್ನು "ಕಾವ್ಯಕಲಾಪ" ಭಾಗ 2 ಎಂಬ ಸಂಸ್ಕೃತ ಕಾವ್ಯ ಪುಸ್ತಕವನ್ನು ಪ್ರಕಟಿಸಲು ಪ್ರಾರಂಭಿಸುತ್ತಿದ್ದೇವೆ. ಇದಕ್ಕೆ ಅನೇಕರ ಸಹಾಯ-ಸಹಕಾರವು ಒದಗುತ್ತಿದೆ.

## ಜಗ್ಗು ಶಿಂಗ್ರೈಂಗಾರ್ಯರಿಗೆ ದೊರೆತ ಸನ್ಮಾನ–ಪ್ರಶಸ್ತಿಗಳು

1. ಮೈಸೂರಿನ ಮಹಾರಾಜರು ಶ್ರೀಮನ್ ನಾಲ್ವಡಿ ಕೃಷ್ಣರಾಜ ಒಡೆಯರು ಇವರ ಪಾಂಡಿತ್ಯವನ್ನು ಮೆಚ್ಚಿ ಜರಿಯ ಶಾಲು, 30 ರೂ.ಗಳನ್ನು ಕೊಟ್ಟು ಗೌರವಿಸಿದರು.

2. ಶೃಂಗೇರಿಗೆ ಹೋಗಿ ಜಗದ್ಗುರುಗಳನ್ನು ದರ್ಶನ ಮಾಡಿ ಅಲ್ಲಿಯ ಶಾರದಾಂಬೆಯ ಮೇಲೆ ಆಶುಕವಿತೆಯನ್ನು ರಚಿಸಿದರು. ಆ ಸಮಯದಲ್ಲಿ ಶೃಂಗೇರಿ ಗುರುಗಳು ಇವರನ್ನು ಸನ್ಮಾನಿಸಿ ಜರಿ ಶಾಲು, ನೂರು ರೂ.ಗಳನ್ನು ಕೊಟ್ಟು ಗೌರವಿಸಿದರು 1936–37.

3. ಮತ್ತೆ ಇವರ 79-80ನೇ ವಯಸ್ಸಿನಲ್ಲಿ ಶೃಂಗೇರಿಗೆ ಹೋಗಿದ್ದು ಜಗದ್ಗುರುಗಳನ್ನು ಸಂದರ್ಶಿಸಿ ತಮ್ಮ ಪ್ರಕಟಿತ ಸಂಸ್ಕೃತ ಗ್ರಂಥಗಳನ್ನು ಗುರುಗಳಿಗೆ ಅರ್ಪಿಸಿದರು. ಗುರುಗಳು ಅಭಿಮಾನದಿಂದ ಜರಿ ಶಾಲುವನ್ನು ಹೊದ್ದಿಸಿ ಜಗ್ಗು ಪಂಡಿತರೇ ಈ ಶಾಲನ್ನು ಇನ್ನು ಪ್ರತಿದಿನ ನೀವು ಹೊದ್ದುಕೊಂಡುಬಿಡಿ ಎಂದು ಅನುಗ್ರಹಿಸಿದರಂತೆ.

4. ಕರ್ನಾಟಕ ಸರ್ಕಾರದ ಮಂತ್ರಿವರ್ಯರಾಗಿದ್ದ ಮಾನ್ಯ ಕೆಂಗಲ್ ಹನುಮಂತಯ್ಯನವರ ಕಾಲದಲ್ಲಿ (1955–56ರಲ್ಲಿ) ಸಂಸ್ಕೃತಿ ಪ್ರಸಾರ ಕಾರ್ಯಕ್ಕಾಗಿ ನಿಯಮಿತಗೊಂಡಿದ್ದರು.

5. ಇವರ ಪಾಂಡಿತ್ಯಕ್ಕಾಗಿ ಜಗ್ಗುರವರಿಗೆ 1979ರಲ್ಲಿ ರಾಜ್ಯ ಪ್ರಶಸ್ತಿ ದೊರಕಿತು. ದಿನಾಂಕ 10-5-79ರಲ್ಲಿ ಶಿಕ್ಷಣ ಸಚಿವರಾಗಿದ್ದ ಮಾನ್ಯ ಸುಬ್ಬಯ್ಯಶೆಟ್ಟರವರ ನೇತೃತ್ವದಲ್ಲಿ ಸನ್ಮಾನ ಸಮಾರಂಭ ನಡೆಯಿತು.

6. ದಿನಾಂಕ 8–8–1979ರಲ್ಲಿ ಶ್ರೀ ಸಾರಸ್ವತ ಮಹಾ ವಿಶ್ವವಿದ್ಯಾನಿಲಯ ಬೆಂಗಳೂರು-ಸಂಚಾಲಕರು ಶ್ರೀ ವಾಸುದೇವ ಬಲ್ಲಾಳರ ನೇತೃತ್ವದಲ್ಲಿ ಶ್ರೀ ಪೇಜಾವರ ಮಠದ ವಿಶ್ವೇಶತೀರ್ಥ ಶ್ರೀಪಾದಂಗಳವರು ದಯಪಾಲಿಸಿದ ಬಿರುದು "ಪ್ರತ್ನವಿದ್ಯಾವಿಚಕ್ಷಣಃ"

7. 1983ರಲ್ಲಿ ಸಾಹಿತ್ಯ ಸೇವೆಯ ಕವಿವರ್ಯರೆಂದು ಮಾಸಿಕ ಗೌರವಧನ 500ರೂ. ಕರ್ನಾಟಕ ಸರ್ಕಾರ ಮಂಜೂರು ಮಾಡಿ ಸನ್ಮಾನಿಸಿತು.

**ಜಗ್ಗೂರವರ ಕೆಲವು ಮುಖ್ಯ ಕಾರ್ಯಕ್ರಮಗಳು**

ಶ್ರೀಮನ್ಮಹಾರಾಜಾ ಸಂಸ್ಕೃತ ಮಹಾ ಪಾಠಶಾಲಾ, ಮೈಸೂರು ಈ ಪಾಠ ಶಾಲೆಯ ಶತಮಾನೋತ್ಸವದಲ್ಲಿ ದಿನಾಂಕ 11-12-1976ರಲ್ಲಿ ಕವಿಗೋಷ್ಠಿಯ ಅಧ್ಯಕ್ಷತೆ ವಹಿಸಿದ್ದರು.

'ಧರ್ಮವ್ಯಾಧ' ನಾಟಕ ಧಾರವಾಡದ ಆಕಾಶವಾಣಿಯಲ್ಲಿ ತಾ|| 8-6-1975ರಲ್ಲಿ ಪ್ರಸಾರವಾಯಿತು.

ಸಂಸ್ಕೃತ ವಿಶ್ವಪರಿಷತ್ ಸಂಸ್ಕೃತ ಅಧಿವೇಶನ ಬೊಂಬಾಯಿಯಲ್ಲಿ 1961ರಲ್ಲಿ ನಡೆಯಿತು. ವಿಶೇಷ ಆಹ್ವಾನಿತರಾಗಿ ಹೋಗಿದ್ದರು.

ದ್ವಿತೀಯ ಅಖಿಲ ಕರ್ನಾಟಕ ಸಂಸ್ಕೃತ ಸಮ್ಮೇಳನ ಶ್ರೀ ಸಿದ್ಧಗಂಗಾ ಕ್ಷೇತ್ರ, ತುಮಕೂರು 1978ರಲ್ಲಿ ನಡೆಯಿತು ; ಕವಿಗೋಷ್ಠಿಯಲ್ಲಿ ಭಾಗವಹಿಸಿದ್ದರು.

**ಜಗ್ಗು ಶಿಂಗ್ರೈಯಂಗಾರ್ಯರ ಕೆಲವು ಆದರ್ಶ ಗುಣಗಳು**

ಮೊದಲನೆಯದಾಗಿ ಆಚಾರ್ಯರಲ್ಲಿ ಭಕ್ತಿ, ದೈವ ಭಕ್ತಿ, ಸರಳ ಸ್ವಭಾವ, ಕಷ್ಟ ಸಹಿಷ್ಣುತೆ, ಪ್ರಾಣಿಗಳಲ್ಲಿ ಬಹಳ ದಯೆಯುಳ್ಳವರು, ಪ್ರಕೃತಿ ಸೌಂದರ್ಯೋಪಾಸಕರು, ಆರೋಗ್ಯ ದೃಢಕಾಯರು. ಅದಕ್ಕೆ ಕಾರಣ ಪ್ರತಿದಿನ ವ್ಯಾಯಾಮ, ಉಪಯುಕ್ತ ಆಹಾರ, ಗಿಡಮೂಲಿಕೆಗಳ ಆಯುರ್ವೇದ ಔಷಧ ಸೇವನೆ, ಈಜುವುದು ಅವರ ಮೆಚ್ಚಿಗೆ ವ್ಯಾಯಾಮ. ಈ ರೀತಿ ಅವರು ಆರೋಗ್ಯವನ್ನು ಚೆನ್ನಾಗಿ ಕಾಪಾಡಿಕೊಂಡು 94 ವರ್ಷ ತುಂಬು ಜೀವನ ನಡೆಸಿ ಪರಮಾತ್ಮನ ಪಾದ ಸೇರಿದರು.

ಅವರು ತುಮಕೂರಿನ ತಮ್ಮ ಸ್ವಗೃಹದಲ್ಲಿ ಒಂದು ಕವಾಟದ ಮೇಲೆ ಶ್ರೀ ನರಸಿಂಹ ದೇವರ ಚಿತ್ರವನ್ನು ಬರೆದಿದ್ದಾರೆ. ಅವರು ಬರೆದ ಆ ನರಸಿಂಹ ದೇವರನ್ನು ಆರಾಧಿಸಿ, ಅರ್ಚಿಸಿ ಪೂಜಿಸಿ ಪ್ರತ್ಯಕ್ಷಮಾಡಿಕೊಂಡರು. ಈಗಲೂ ಅದು ನಮ್ಮ ಮನೆದೇವರಾಗಿ ವೈಭವದಿಂದ ಪೂಜೆ ಮಾಡಿಸಿಕೊಂಡು ನಮ್ಮನ್ನೆಲ್ಲಾ ಸಲಹುತ್ತಿದ್ದಾರೆ.

ಆ ನರಸಿಂಹ ದೇವರ ಸ್ತೋತ್ರ ಶ್ರೀ ಜಗ್ಗೂರವರು ಬರೆದದ್ದು ಹೀಗಿದೆ :

**अरे ! नृहरे, कस्मात्त्वरेत्थं प्रतिष्ठितः ?**
**स्तंभोद्भवस्य सान्निध्यं कवाटे युक्तमेव ते ॥**

**मंगलम्**

ಆ ಪುಣ್ಯಪುರುಷನ ಪರಲೋಕ ಯಾತ್ರೆಯ
ಅಪೂರ್ವ ಘಟನೆಯ ಏನೆಂದು ಬಣ್ಣಿಸಲಿ ?
ವಿಷ್ಣುದೂತರ ಪರಮಾಚಾರ್ಯರ
ದರ್ಶನವಾಯ್ತೆಂದು ಆ ಭಕ್ತನಿಗೆ

ರಕ್ತಾಕ್ಷಿ ಪುಷ್ಯ ಉತ್ತರಾಯಣ
ಪುಣ್ಯಕಾಲ ಏಕಾದಶಿ ಈ ಪರ್ವ
ಕಾಲದಿ ಪರಮಾತ್ಮನಲಿ
ಐಕ್ಯನಾದನು ಆ ಪಾವನನು.

ಬದುಕು ಬರಡಾಗದಂತೆ ಬಾಳಿ
ಸಂಸ್ಕೃತ ಸಾಮ್ರಾಜ್ಯಕೆ ಶಿಖರದಂತಿದ್ದು
ನಡೆ ನುಡಿಯಲಿ ವಿನಯ ಗಾಂಭೀರ್ಯದಿ
ಮಾರ್ಗದರ್ಶನ ನೀಡಿ ನಮ್ಮನ್ನಗಲಿದ
ಮಹಾನ್ ವ್ಯಕ್ತಿ ಪಿತೃವಿಗೆ ನಮೋ ನಮಃ



Lord Thirunarayana of Melkote



Lord Narasimhaswamy installed in "Kavata" by Jaggu Singra Iyengar at his residence, Tumkur



"Utsava Murthy"
Lord Shelvapillai of
MELKOTE TEMPLE

|| श्रीमते रामानुजाय नमः ||

# हयग्रीवस्तुतिः

शङ्खं च चक्रं वरपुस्तकं च व्याख्यानमुद्रामपि शुभ्रमूर्तिः ।
बिभ्रच्चतुर्भिश्च करैर्मुरारिः श्रिया सहाभाति हयाननोऽयम् ॥

शुभ्रांबरश्शुभ्रतनुः शुभाख्यश्शुभ्रांशुबिंबस्थितशुभ्रपद्मे ।
शुभ्राभया शुभ्रदुकूलयाङ्के निषण्णयाऽस्ते रमया हयास्यः ॥ १ ॥

**वाजी ॥**

हस्ताः पुस्तकशङ्खचक्रविलसद्व्याख्यानमुद्रांचिताः
पीठं स्फाटिकशुभ्रवर्णजलजं शुभ्रांशुबिंबस्थितम् ।
अंकस्थानमलंकृतं च सततं पंकेरुहावासया
यस्यायं भगवान् स वाजिवदनो ज्ञानप्रदो राजते ॥ २ ॥

**वाहः ॥**

वाहेन तेन महता भवतानुकम्पा
बाहुल्यदोहदहृदाऽहमिहेक्षितो यत् ।
आहस्करोस्रनिचयाहतसान्द्रशीत-
नीहारवद्व्यपगतो मम देहमोहः ॥ ३ ॥

**अर्वा ॥**

गीर्वाणवैरिगर्वघ्नं सर्वाभीष्टप्रदं नृणाम् ।
निर्वाणसुखलाभार्थमर्वाननमहं श्रये ॥ ४ ॥

**गन्धर्वः ॥**

गन्धर्वयक्षासुरकिन्नरसिद्धवृन्दं
गन्धर्वकन्धरहरेऽब्धिसुतापते ते ।
सौन्दर्यदर्शनभवानुभवादमन्द-
मानन्दमेत्य ननु नन्दति वन्दते त्वाम् ॥ ५ ॥

सैन्धवः ॥

मुकुन्द भो सैन्धव कन्धर त्वं
यं वीक्षसे मन्दधियं च सोऽपि ।
प्राज्ञस्तदैवाद्भुतवाक्चकास्ति
वाचस्पतिश्चापि कविश्च भूत्वा ॥ ७ ॥

सप्तिः ॥

त्वमेक एवासि हि सप्तसप्ति-
बिम्बे सरोजासनसन्निविष्टः ।
तथा सुधांशोरपि बिम्बमध्ये
हरेऽम्बुजे तिष्ठसि सप्तिवक्त्रः ॥ ८ ॥

विदुषामरसिंहेन नामलिंगानुशासने ।
हयपर्यायशब्दा ये कृतास्तैस्संस्तुतो हरिः

## भूवराहस्तुतिः

वामाङ्कदेशे वसुधां निवेश्य
ज्ञानोपदेशात्मकहस्तमुद्राम् ।
शङ्खं च चक्रं च दधन्मुरारिः
वराहमूर्तिर्हरतान्ममार्तिम् ॥ १ ॥

स्वस्थे स्थिते मनसि वर्ष्मणि धातुसाम्ये
योऽजं नरस्स्मरति मां हृदि विश्वरूपम् ।
तं भक्तमत्र मरणोन्मुखमश्मकल्पम्
स्मृत्वा नयामि परमां गतिमित्यवोचः ॥ २ ॥

इदं वचस्साधु विचिन्त्य विष्णो त्वदुक्तमत्यन्तदृढं च तथ्यम् ।
मदन्तकाले नय मां पदं ते पदे पदे त्वामिदमेव याचे ॥ ३ ॥

# श्री नृसिंहस्तुतिः

लक्ष्मीसखाय मृगराजमुखाय दृप्य-
दैत्यप्रमापणनखाय जगत्सुखाय ।
प्रह्लादपालनपराय परात्पराय
स्तम्भोद्भवाय चिदचिद्वपुषे नमस्ते ॥ १ ॥

नखदीर्णदैत्यदृढपुष्टवक्षसे
विकटाट्टहासदलिताण्डभित्तये ।
प्रणमत्कयाधुतनयाभिरक्षिणे
भगवन् नृसिंह भवते नमो नमः ॥ २ ॥

मृगमानुषव्यतिकरस्वरूपिणे
रिपुरक्तलेपनसुशोणमूर्तये ।
रमयानिवारितभयङ्करक्रुधे
भगवन् नृसिंह भवते नमो नमः ॥ ३ ॥

दशरूपकेषु तव विश्वरूपिणो
महिमातिगं वपुरिदं तु तावकम् ।
यदिदं हिरण्यकशिपोर्वरान् ग्रसत्
भगवन् नृसिंह भवते नमो नमः ॥ ४ ॥

अकरोर्हिरण्यकशिपुं रमासमं
भवदङ्कशाय्यपि स ते नखैर्यतः ।
क्षतवत्स एव विरतो न निद्रया
भगवन् नृसिंह भवते नमो नमः ॥ ५ ॥

यदुशैलशृङ्गगृहनित्यवासिने
श्रितभोग्ययोगदृढपीठमीयुषे ।
वरशङ्खचक्रमकुटादिधारिणे
भगवन् नृसिंह भवते नमो नमः ॥ ६ ॥

## कवाटनृसिंहस्तुतिः

अररे नृहरे कस्मादररे त्वं प्रतिष्ठितः ?
स्तंभोद्भवस्य सान्निध्यं कवाटे युक्तमेव ते ॥

## श्रीनरसिंहमङ्गलाशासनम्

वदनोज्ज्वलदंष्ट्राय यदुशैलाग्रवासिने ।
मुदिरासितगात्राय सदयायास्तु मङ्गलम् ॥ १ ॥

स्तंभसंभवसंरंभस्तंभितांभोजभूहृदे ।
शंभुदंभभिदे भूयात् जृंभितांगाय मङ्गलम् ॥ २ ॥

गर्जनध्वानभीतारिजर्झरीकृतवक्षसे ।
निर्जरप्रमुखेड्याय वज्रदंष्ट्राय मङ्गलम् ॥ ३ ॥

युद्धप्रवृद्धक्रोधाय शुद्धसत्वमयाय ते ।
वृद्धाय नित्ययूने स्यात् सिद्धसेव्याय मङ्गलम् ॥ ४ ॥

अनिरीक्षितवेषाय वनमालाधराय ते ।
घनसायंकृताराातिहननायास्तु मङ्गलम् ॥ ५ ॥

सुखदात्मस्वरूपाय नखदीर्णारिवक्षसे ।
मुखमात्रमृगेन्द्राय मखभोक्त्रेऽस्तु मङ्गलम् ॥ ६ ॥

रक्तसिक्तनखायास्मै भक्तप्रह्लादबन्धवे ।
व्यक्तशक्तिमहिम्ने च मुक्तिदायास्तु मङ्गलम् ॥ ७ ॥

ज्वलदग्निलसज्जिह्वास्खलद्रक्षोस्त्रबिन्दवे ।
दलिताण्डकटाहाय बिलवासाय मङ्गलम् ॥ ८ ॥

अष्टबाहुदुरीक्ष्याय दुष्टदैत्यविघातिने ।
सृष्टिरक्षादिदक्षाय शिष्टसेव्याय मङ्गलम् ॥ ९ ॥

रमादर्शनशान्तात्मन् उमापतिनुताय ते ।
विमानस्थामराकीर्ण सुमार्चित सुमङ्गलम् ॥ १० ॥

करस्थशङ्खचक्राय निरस्ताश्रितपाप्मने ।
उरस्थश्रीमनोज्ञाय सुरस्तव्याय मङ्गलम् ॥ ११ ॥

कृशमध्यप्रदेशाय विशालोरस्थलाय ते ।
पिशिताशपिशाचादिमशकघ्नाय मङ्गलम् ॥ १२ ॥

शालग्रामशिलावास बालग्रहनिरासक ।
नीलविग्रह ते भूयात् शैलाग्रगृहमङ्गलम् ॥ १३ ॥

अजाय जायमानाय द्विजराजध्वजाय ते ।
वृजिनव्रजसंहर्तृनिजनाम्नेऽस्तु मङ्गलम् ॥ १४ ॥

फणिराजफणाच्छत्रमणिभादीप्तमन्दिर ।
प्रणतेष्टप्रदात्रे ते प्रणवात्मक मङ्गलम् ॥ १५ ॥

शरण्याय वरेण्याय हिरण्यकशिपुच्छिदे ।
स्थिरयोगासनस्थाय नरसिंहाय मङ्गलम् ॥ १६ ॥

मङ्गलात्मकपद्यानि मधुस्यन्दीनि षोडश ।
नृहरेर्यः पठेन्नित्यं स सर्वशुभभाग्भवेत् ॥ १७ ॥

## वामनस्तुतिः

भोः प्रथमाश्रम पंकजलोचन तुन्दिलकान्ततनो
यज्ञसुसूत्रपवित्रमृगाजिनमौंजिपलाशधर ।
फालतलोर्ध्वसुपुण्ड्रविराजितरम्यशिखाग्रशिरः
सर्वमनोहर यज्ञसमर्चित वामन तेऽस्तु नमः ॥

## विविधविषयकाः

भृगुसुतभृतघोरक्रोधवह्निघ्नमेघः
विघटितघनदुःखप्रीतसुग्रीवसख्यः ।
रघुपतिरघहर्ताऽमोघबाणौघमोक्ता
विघसफलकृताशः पातु सीतापतिर्नः ॥

पाणिस्फुरत्पांडुरपांचजन्यं प्रवृद्धपादप्रभवाम्बुपूरम् ।
पयोधिपुत्रीपरिपूजितांघ्रिं प्रफुल्लपद्माक्षमहं प्रपद्ये ॥

## भगवदनुसन्धानम्

कृपामपारामुपमापलापकां
प्रपूरयन् पापिजनेऽपि कामपि ।
अपास्य तापानुपपाद्य सम्पदः
स पातु नः कोऽपि च पूर्वपूरुषः ॥

दशावतारस्त्रिदशेशशंसितः
निशाचरश्रेणिनिवारणोत्सुकः ।
दशाननात्युच्चदशाविनाशकः
दिशत्वसौ दाशरथिश्शुभानि नः ॥

भूजया जायया नैजजीवने जातजागरः ।
राजते राजतेजाः श्रीरामो राजीवलोचनः ॥

## चित्तं प्रति

सीतापतौ प्रथितशक्तियुते प्रशान्ते ।
पूतात्मनि श्रुतिततिस्तुतसच्चरित्रे ।
वातात्मजातरचितापचितौ सुजाते
ख्याताश्रितावनकथे कुरु चित्त ! भक्तिम् ॥

## श्रीरामचन्द्रभगवान्

अगस्त्यात्रिभरद्वाजमतंगादिमहर्षयः ।
तपस्तप्त्वा कृतार्थाः यं दृष्ट्वा तं राममाश्रये ॥ १ ॥

नमस्सीतालक्ष्मणाभ्यां रामाय वसते वने ।
अनुजीकृतसुग्रीवविभीषणगुहाय ते ॥ २ ॥

विभीषणं च सुग्रीवं ज्येष्ठराज्येऽभिषिच्य यः ।
रामो भरतवत्तावप्यस्मरत्तं स्मराम्यहम् ॥ ३ ॥

अतिक्रान्तमनुष्यार्ह कृत्योऽपि सततं च यः ।
आत्मानं मानुषं मेने तं वन्दे राममच्युतम् ॥ ४ ॥

रजस्स्वशिरसावहन् रघुपतेः पदाब्जोद्भवं ।
पिबंश्च मधुरं सदावचसि रामनामामृतम् ॥ ५ ॥

तदीयचरितं स्मरन् दुरितदूरमानन्ददं ।
नरो मरणमाविशन् भवति मोक्षसाम्राज्यभाक् ॥ ६ ॥

# भगवति विस्रम्भः

मरणावसरे त्वजामिळस्त्वां
सुतनारायणनाम किंचिदुक्त्वा ।
विपदामपदपदं प्रपेदे
कृपया नित्यामपारया मुरारेः ॥

पुरुषोत्तम पद्मनाभ शार्ङ्गिन्
नरसिंहाच्युत वासुदेव विष्णो ।
मधुसूदन माधवाब्धिशायिन्
सततं त्वां परिकीर्तयाम्यहं भोः ॥

नरकान्तक नारदार्चितांघ्रे
मुरवैरिन् रघुरामकृष्णशौरे ।
परिपालय मां मयि प्रसीदे-
त्यहमद्याकलये स्तुवन् भवन्तम् ॥

भगवानसुरारिरेवमीषत्
निजनामोच्चरणेन भक्तवश्यः ।
कुरुते किल तस्य नित्यसौख्यम्
नहि मां मुंचति तं सदा स्तुवन्तम् ॥

भगवति भवति प्रभवति
भवतिमिरभरमिहिरे नृहरे ।
न भवति भीतिर्भवतो
भवतोऽघ्रिं मे भृशं भजतः ॥

एकत्र पापानि मया कृतानि
चान्यत्र ते श्रीश कृपामपाराम् ।
विचिन्त्य डोलायितमानसोऽहं
बिभेमि भूयो न बिभेमि भूयः ॥

मदीयदोषान् प्रबलानसह्यान्
तथैव तेऽनल्पदयामुदाराम् ।
चिरं स्मरन् भ्रान्तमनाः मुरारे
बिभेमि भूयो न बिभेमि भूयः ॥

झषक्रोडनृसिंहादिभयंकरतनूस्तव ।
स्मृत्वा च पार्थसारथ्यं बिभेमि न बिभेमि च ॥

विष्णो सहस्रनामार्च्य भयकृद्भयनाशनः ।
इति त्वं स्तुतवान् तस्मात् बिभेमि न बिभेमि च ॥

शौरे प्रकृत्या चपलं मनो मे न मां प्रपन्नं त्यजसीति सत्यम् ।
विश्वासलेशोऽपि न मेऽत्र तादृक् ततस्त्वमेवास्य गतिर्ममासि ॥

## गीतम्

पाहि पाहि पद्मनाभ पार्थसारथे ।
पाहि पाहि पीतवसन परमपूरुष ॥ १ ॥

पाहि पाहि वासुदेव वासवानुज ।
पाहि पाहि शेषशयन शंकरार्चित ॥ २ ॥

पाहि पाहि दैत्यदमन दानवान्तक ।
पाहि पाहि नीरजाक्ष नारदार्चित ॥ ३ ॥

पाहि पाहि रामचन्द्र रावणान्तक ।
पाहि पाहि भरतविनुत भक्तवत्सल ॥ ४ ॥

पाहि पाहि दुरितदूर देवकीसुत ।
पाहि पाहि मुरमर्दन मुनिजनार्चित ॥ ५ ॥

पाहि पाहि गरुडगमन गोपिकाप्रिय ।
पाहि पाहि कैटभघ्न कौस्तुभोज्वल ॥ ६ ॥

पाहि पाहि कंसमथन कृष्ण केशव ।
पाहि पाहि रुक्मिणीश राक्षसांकुश ॥ ७ ॥

पाहि पाहि सुगुणपूर्ण सुरनुतचरण ।
पाहि पाहि निरवधिदय नित्यनिर्मल ॥ ८ ॥

पाहि पाहि वेदवेद्य विश्ववन्दित ।
पाहि पाहि पूर्णकाम पूतनान्तक ॥ ९ ॥

पाहि पाहि मारजनक माधवप्रभो ।
पाहि पाहि मोक्षसुखद मंगलात्मक ॥ १० ॥

## श्रीरामचन्द्रमङ्गलाशासनम्

भाग्याद्दशरथस्यापि कौसल्यायाश्च भाग्यतः ।
तत्पुत्रत्वेन जाताय रामचन्द्राय मङ्गलम् ॥ १ ॥

परब्रह्मस्वरूपाय लीलामानुषरूपिणे ।
अयोध्यापुरवासाय रामभद्राय मङ्गलम् ॥ २ ॥

हनूमता सीतया च लक्ष्मणेन च सेवितः ।
योऽयोध्यायां महानास्ते तस्मै रामाय मङ्गलम् ॥ ३ ॥

विश्वामित्रेष्टदात्रेस्यादहल्याघविघातिने ।
पवित्रपदपद्माय रघुनाथाय मङ्गलम् ॥ ४ ॥

मिथिलायां धनुश्शैवं भङ्क्त्वा जनकनन्दिनीम् ।
यः पर्यणयदौत्सक्यात्तस्मै रामाय मङ्गलम् ॥ ५ ॥

चित्रकूटोऽभवद्यस्मै सदायोध्यापुरादपि ।
सुखदोऽनुजसीताभ्यां युक्तायास्मै सुमङ्गलम् ॥ ६ ॥

वितीर्य पादुके स्वीये भक्ताय भरताय यः ।
अकारयद्राज्यरक्षां तस्मै रामाय मङ्गलम् ॥ ७ ॥

अन्तःपुरापराधेन वध्यं काकमपि प्रभुः ।
योऽरक्षत्कृपया तस्मै श्रीरामायास्तु मङ्गलम् ॥ ८ ॥

निशाचरगणान्हत्वा मुनीनां सुखदायिने ।
कोसलप्रभवे नित्यं रामभद्राय मङ्गलम् ॥ ९ ॥

अगस्त्यादिभरद्वाजमतङ्गादिमहर्षिभिः ।
संपूजिताय पूज्याय रामचन्द्राय मङ्गलम् ॥ १० ॥

गुहप्रियाय शबरीकृतातिथ्यादृताय च ।
विभीषणेनार्चिताय श्रीरामायास्तु मङ्गलम् ॥ ११ ॥

वाङ्मनोऽचिन्त्यकल्याणगुणपूर्णात्मतेजसे ।
पवित्राय प्रशान्ताय श्रीरामायास्तु मङ्गलम् ॥ १२ ॥

सकृत्प्रपत्तिमात्रेण स्वाश्रितानवते सदा ।
दयार्द्रहृदयायास्तु रामभद्राय मङ्गलम् ॥ १३ ॥

सुग्रीवः कपिरप्यासीत् यस्य मित्रं जगत्पतेः ।
बबंध सेतुमब्धौ यस्तस्मै रामाय मङ्गलम् ॥ १४ ॥

त्रिलोककण्टकं हत्वा रावणं तस्य सोदरे ।
विभीषणेऽकरोल्लङ्कां यस्तस्मै नित्यमङ्गलम् ॥ १५ ॥

ब्रह्मरुद्रेन्द्रदेवैर्यः परब्रह्मेत्यपि स्तुतः ।
आत्मानं मानुषं मेने तस्मै रामाय मङ्गलम् ॥ १६ ॥

आसेचनकसौन्दर्यवशीकृतजगत्त्रय ।
मन्दस्मिताब्जनयन तुभ्यं रामाय मङ्गलम् ॥ १७ ॥

वाल्मीकेर्मुनिवर्यस्य वाणीं स्वाभिख्यया मुहुः ।
सुधामयीमकार्षीद्यः तस्मै रामाय मङ्गलम् ॥ १८ ॥

सरयूसरिताश्लिष्टे साकेतनगरे वरे ।
सीतया रममाणाय कल्याणं मङ्गलं शुभम् ॥ १९ ॥

चराचरानशेषान्यस्साकेतस्थान्सहात्मना ।
वैकुण्ठमनयत्तस्मै श्रीरामायास्तु मङ्गलम् ॥ २० ॥

# श्री पद्मावत्यष्टोत्तरशतनामावलिः

## ॥ ध्यानम् ॥

देवी दुग्धपयोधिराजतनयां शेषाद्रिनाथप्रियां
सर्वामर्त्यवधूकरार्चितपदां सौभाग्यदां भार्गवीम् ।
मन्दापाङ्गविलोकमात्ररचितब्रह्मेशनाकाधिपां
वन्दे पद्मनिवासिनीं भगवतीं पद्मावतीं मातरम् ॥ १ ॥

करधृतकमले कृपाप्रपूर्णे
वरदभयक्षपणाब्जपाणियुग्मे ।
विशदवसनगन्धमाल्यरम्ये
मयि हरिपत्नि सदा प्रसीद लक्ष्मि ॥ २ ॥

प्रकृतिं विकृतिं प्रज्ञां प्रकृष्टां प्रतिभां धियं ।
निर्मलां नन्दनानन्दां नमामि निरुपद्रवाम् ।। १ ।।

गन्धर्वगीतचरितां किन्नरस्तुतवैभवाम् ।
शुभ्रमालां शुभ्रगन्धां शुभ्राङ्गीं शुभ्रवाससीम् ।। २ ।।

कम्बुकण्ठीं विशालाक्षीं तनुमध्यां कृशोदरीम् ।
चन्द्राननां चन्द्रहासां चन्द्रशीतलदर्शनाम् ।। ३ ।।

चन्द्रानुजां चन्द्रचूडां चन्द्रबिम्बस्थलस्थिताम् ।
सौभाग्यदायिनीं सिद्धिं शुद्धसत्त्वस्वरूपिणीम् ।। ४ ।।

सीतावतारां प्रख्यातां रुक्मिणीं रुक्ममन्दिराम् ।
शुभात्मिकां शुभोत्कर्षां वन्दे मङ्गलदेवताम् ।। ५ ।।

दयामयीं दानशीलां दारिद्र्यदमनां धराम् ।
पवित्रां पूतचरितां पापघ्नां परमार्थदाम् ।। ६ ।।

गजाश्वरथसौभाग्यदायिनीं भार्गवीं रमाम् ।
वकुलाम्बात्मजां बालां वन्दे पद्मावतीं सतीम् ।। ७ ।।

तुष्टिपुष्टिकरीं हृष्टां धनदान्यप्रदार्थिनीम् ।
वेदान्तवेद्यविभवां वासुदेवविलासिनीम् ।। ८ ।।

कालत्रयज्ञां सर्वज्ञां वन्दे शर्वप्रियार्चिताम् ।
हेमवस्त्रां हिरण्याभां हिरण्यस्रग्विभूषिताम् ।। ९ ।।

किरीटहारकेयूराद्यमिताभरणोज्ज्वलाम् ।
सरस्वतीं च गायत्रीं सावित्रीं प्रणवात्मिकाम् ।। १० ।।

श्रीनिवासप्रणयिनीं श्रीनिवासाढ्यहृत्स्थिताम् ।
फालस्थलस्थकस्तूरीकुङ्कुमस्थासकोज्ज्वलाम् ।। ११ ।।

पटीरलिप्तावयवां पुण्यगन्धां परात्पराम् ।
चतुःपुमर्थदां वन्दे चारुहासां चतुर्भुजाम् ।। १२ ।।

हस्तिहस्तस्थितस्वर्णकुम्भपीयूषसेचिताम् ।
कुमुदाच्यां कुन्दमालां कौस्तुभाभाभिवर्धिनीम् ।। १३ ।।

कल्हारमालां कल्याणीं कोमलां कल्पवल्लरीम् ।
मुग्धाङ्गीं मन्दगमनां मन्दारकुसुमस्रजाम् ।। १४ ।।

वेङ्कटेश्वरसन्तोषप्रवर्धकशुभक्रियाम् ।
वैश्वानरशिखां वन्दे नक्षत्ररुचिरप्रभाम् ।। १५ ।।

सूर्यप्रभां सोमरुचिं सर्वकान्तिस्वरूपिणीम् ।
पुरन्दरार्चितपदां पुराणपुरुषप्रियाम् ।। १६ ।।

साकारविलसद्दिव्यनवनिध्युपलालिताम् ।
लसदष्टविधाकारलक्ष्मीमष्टविभूतिदाम् ।। १७ ।।

बिल्वपत्रार्चितां वन्दे मृदुबिम्बफलाधराम् ।
भोगीन्द्रभोगशयनां हरिणीं हितकारिणीम् ।। १८ ।।

सामगानस्तुतोत्कृष्टपरिशुद्धयशस्विनीम् ।
वेदात्मविहगेन्द्रोच्चस्कन्धसुन्दरवाहनाम् ।। १९ ।।

अचिन्त्यामेयदिव्यात्मवैभवोत्कर्षमानिताम् ।
क्षीराब्धितनयां वन्दे जगदम्बां जयप्रदाम् ।। २० ।।

## श्रीराघवेन्द्रगुरवे नमः

मन्तारं त्रायतेऽयं तदिह बुधजनैः मन्त्रइत्युच्यतेत-
न्मन्त्राणामालयेऽसौ जगति सुविदितः हन्त मन्त्रालयाख्यः ।

तस्मादत्रागतानां गुरुवरचरणानुग्रहाद्भक्तिभाजा-
मक्लेशादेवमन्त्रव्रजजपफलदो राजते भूतलेऽयम् ॥ १ ॥

पूतं द्वैतं मतं तत्प्रसरणसरणौ व्यासमुख्या यतीन्द्राः
नीरन्ध्रं सान्द्रमोहव्यसनकृशजनश्रेयसे बद्धदीक्षाः ।
आचार्याः पूतचर्या निजफणितिसुधाधारया पूरयन्तः
स्वान्तं तान्तं नितान्तं भवभवविपदालोकमुज्जीवयन्ति ॥ २ ॥

ये तुङ्गभद्रासरितीह भक्त्या विगाह्य वृन्दावनमध्यभाजम् ।
श्रीराघवेन्द्रार्यगुरुं भजन्ते ते जन्ममृत्युव्यसनं तरन्ति ॥ ३ ॥

त्वं भक्तवृन्दावनकांक्षयात्र वृन्दावनान्तः कृतसन्निधानः ।
जनौघनानाघविघातहेतुः श्रीराघवेन्द्राद्य गुरो ! गुरुर्नः ॥ ४ ॥

परिमळ परिमळबहुळे श्रुतिशिरसि श्रीगुरुप्रयत्नेन ।
हरिरपि परात्परोऽसौ मुदममितां प्राप सर्वेशः ॥ ५ ॥

रुग्णा भग्नरुजस्तथा कुमतयश्शुद्धाशयाः नास्तिका-
द्रागास्तिक्ययुताः विषण्णमनसस्संतोषिणस्तत्क्षणात् ।
सम्पन्नाः धनकांक्षिणश्च सकलास्त्वेवं जनाः भक्तितः
श्रीमद्राघवसंयमीन्द्रकरुणाभाजो भजन्तीप्सितान् ॥ ६ ॥

## ममान्तरङ्गनाथो मां रङ्गनाथोऽभिरक्षतु

कवेराजतुङ्गतरङ्ग सङ्गात्
सुशीतवाताहत तिग्मतापे ।
रङ्गे भुजङ्गशयमिन्दिरेशं
कृपायतापाङ्गमुपाश्रयेऽहम् ॥ १ ॥

एकं न्यस्य भुजं शिरोधिनिकटे सङ्कुचितं चापरम्
बाहुं जानुसमीपगं च कलयन्पीतांबरालंकृतः ।
नानाभूषणभूषितो भुजगराड्भोगे शयानश्श्रिया
सम्यक्सेवितपादभाग्विजयते श्रीरङ्गनाथः प्रभुः ॥ २ ॥

अतीक्ष्णाक्षिक्षेपक्षरदमृतधारयितकृपा-
परीवाहैस्सिञ्चन् चरणनतनानाश्रितजनान् ।
अपूर्वानन्दश्रीवितरणवशादत्रकलयन्
विभूतिं तां नित्यां जयति भगवान् रङ्गनिलयः ॥ ३ ॥

अंगनाजनकटाक्षविलासैः भङ्गुरेऽपि विषये तृषितस्य ।
मंगलप्रदमहामहिमानौ रङ्गनाथ चरणौ शरणं मे ॥ ४ ॥

रङ्गनाथ भगवन्करुणालो स्वागतं भवदमेयमहिम्नः ।
नित्यसूरिभिरिहापि महद्भिः सेव्यसे परमधाम्नि यथा त्वम् ॥ ५ ॥

शताधिकेषूत्तमदिव्यदेशे-
ष्विदं हि रङ्गस्थलमाहुराद्यम् ।
यस्माद्रमेशो भगवानिहास्ते
रामार्चितांघ्रिः फणितल्पशायी ॥ ६ ॥

सरयू सरितांचितेह्ययोध्यानगरेऽभू रघुरामसेवितांघ्रिः ।
अधुना तु कवेरजावृतायां पुरि लक्ष्म्या सह मोदसे किल त्वं ॥ ७ ॥

भात्तांघ्रिरेणु मुनिवाहन सूरिगोदे-
त्युत्कृष्ट-भक्तजन-सूक्तिभिरीडितस्सन् ।
तेषामदास्सपदि मोक्षसुखं दयालो
मां पापिनं च नय तत्र चिरात्प्रपन्नम् ॥ ८ ॥

गंभीरसद्गुणगणो विभीषणकरार्चितः ।
नभोनिभो भवत्राता प्रभाते स्मरणेऽस्तुमे ॥ ९ ॥

कावेरावृतदिव्यधाम्न्यहिशयं श्रीरङ्गनाथं भजे
वन्दे वेङ्कटभूधरेशमनिशं श्री श्रीनिवासं प्रभुम् ।
सेवे श्री वरदं द्विपाचलपतिं भक्तेप्सितार्थप्रदं
संपत्पुत्रमुपाश्रये यदुगिरौ नारायणं श्रीयुतम् ॥ १० ॥

## भजे वेङ्कटेशं श्रये श्रीनिवासम्

भुजङ्गाचलाग्रस्थहेमालयान्त-
स्थलं नीलरत्नत्विषाविग्रहेण ।
मुहुर्भासयन्तं सुकान्तं महान्तं
भजे वेङ्कटेशं श्रये श्रीनिवासम ॥ १ ॥

स्फुरद्रत्नभास्वत्किरीटाभिरामं
ललाटस्थकर्पूरचूर्णोर्ध्वपुण्ड्रम् ।
मनाङ्मन्दहासाधरोष्ठास्यपद्मम्
भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ २ ॥

कृपापूर्णसौम्येक्षणाब्जावलोकैः
नतानेकभूतौघरक्षैकदीक्षम् ।
मणिस्तोमकान्तिच्छटाकर्णपूरम्
भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ ३ ॥

कराग्रोल्लसच्छङ्खचक्रायुधाढ्यम्
रमावासरम्यायतोरःप्रदेशम् ।

लसत्पीतवासःप्रभारञ्जिताङ्गम्
भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ ४ ॥

अनर्घस्फुरद्रत्नभूषाविशेषै-
रनेकैस्सदालङ्कृतं मङ्गलाङ्गम् ।
सुगन्धप्रसूनावलिस्रक्सुरम्यं
भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ ५ ॥

पदाब्जं श्रयध्वं ममेत्यादरेण
ब्रुवाणं स्वभक्तान् करन्यासभङ्ग्या ।
जगज्जन्मरक्षाक्षयादिस्वलीलं
भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ ६ ॥

भवाब्धिर्भवेज्जानुदघ्नं श्रितानां
इति व्याहरन्तं करेणापरेण ।
धृतार्चावतारं (परं ब्रह्म) नित्यं
भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ ७ ॥

पदाब्जानतानेकदेवाधिपानां
किरीटस्थरत्नप्रभाभासिताङ्घ्रिम् ।
त्रिलोकैकनाथं (त्रयीमौलिवेद्यं)
भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ ८ ॥

धनं भक्तलोकैरनेकैर्गृहीत्वा
तदीयां समस्तां विपत्तिं निवार्य ।
अभीष्टानि दत्वा च सर्वानवन्तं
भजे वेङ्कटेशं श्रये श्रीनिवासम् ॥ ९ ॥

नमश्श्रीनिवासाय सर्वान्तरात्मन् !
   नमस्तेस्तु पद्मावतीवल्लभाय ।
नमो वेङ्कटाद्रिस्फुरत्कालमेघ !
   प्रपन्नाप्तबन्धो ! नमस्तेस्तु नित्यम् ॥ १० ॥

श्रीस्वामिपुष्करिणिकापरिशुद्धतीर्थे
   स्नात्वा मृदूर्ध्वतिलकोज्वलफालदेशाः ।
श्रेणीकृताः भगवतः पददर्शनार्थं
   भक्तास्सदा प्रतिदिनं प्रतिपालयन्ति ॥

विशेषः —एतेषु श्लोकेषु आवरणस्थविशेषणानि श्री भगवद्रामानुजस्य श्रीभाष्यमङ्गलश्लोकस्य विशेषणसंवादीनि । तच्छ्लोकस्य आरंभः एवं—"अखिलभुवनजन्म . . . .

## अष्टलक्ष्मीस्तुतिः

पद्मे पयोजलनिधेस्तनये कृपालो !
   शक्तिप्रदे समरसीम्नि समाश्रितानाम् ।
ओजः प्रतापबलवीर्यगुणानशेषा-
   नुत्पाद्य रक्षसि सदा किल वीरलक्ष्मीः ॥ १ ॥

त्वत्पादपद्मयुगलं समुपाश्रितैस्तु
   प्रारभ्यते समुचितं शुभकर्म यद्यत् ।
पद्मालये तदखिलं च निरन्तरायं
   सिद्ध्यत्यहो विजयलक्ष्मि तव प्रसादात् ॥ २ ॥

केयूरहारमणिकुण्डलरत्नकाञ्ची-
मञ्जीरकङ्कणकिरीटवरोर्मिकाद्यैः ।
दिव्यैर्विभूषणवरैः परिकर्मिताङ्गी
या भाति सा हृदि ममास्तु सुवर्णलक्ष्मीः ॥ ३ ॥

क्षीराब्धिमन्थनभवश्रममच्युतं तं
मन्दाक्षसुन्दरदृशा परिसान्त्वयन्ती ।
कल्लोलजालजठरादुदभूच्च या सा
सन्मङ्गलानि तनुतादिह बाललक्ष्मीः ॥ ४ ॥

पुष्टिं च तुष्टिमपि शिष्टजनावनार्थ-
मैश्वर्यमष्टविधमिष्टतमं विशिष्टम् ।
सृष्ट्वा ददासि जगतामपि जीवनार्थं
मृष्टान्नमम्ब ! सृजसीह सदान्नलक्ष्मीः ॥ ५ ॥

क्षीराम्बुधौ प्रमथिते सति तत्र नाना-
वस्तूनि तान्युदभवन् किल तैः फलं किम् ।
सम्प्रार्थितार्थममृतं यदजायतां ते
तेऽनुग्रहादमृतलक्ष्म्यभिधासि तस्मात् ॥ ६ ॥

सर्वत्र साधनमिदं खलु धैर्यमेव
कार्यप्रवर्तनविधाविति कथ्यते हि ।
प्रत्यूहभग्नकुतुकस्य जनस्य चित्ते
त्वं धैर्यलक्ष्म्यभिधयेत्य कटाक्षसे तान् ॥ ७ ॥

वागीश्वरी शुभकरी श्रयतो जनान् त्वां
पूर्णातुलप्रतिभया परिपूरयन्ती ।
लोकोत्तरप्रवचनैकपटून् विधाय
पुष्णासि भार्गवि ! सरस्वतिरूपलक्ष्मीः ॥ ८ ॥

## फलश्रुतिः

स्वयमेव कृपानिलयस्य हरेः हृदयं सदनं विरचय्य रमे ।
अपराधिजनेऽपि यथा दयते दयितस्स्वहिताय तथा कुरुषे ॥ १ ॥

करयुग्मधृताम्बुरुहेऽब्धिसुते !
वरदाभयहस्तयुते महिते ।
वरभूषणदीप्रतनो प्रणता-
नरविन्दनिवासिनि ! पालय नः ॥ २ ॥

सर्वेप्सितार्थपरिपूरणजागरूकां
सम्भाविताष्टविधरूपमनोज्ञलक्ष्मीम् ।
स्मृत्वाथ ये स्तुतिमिमां मनुजाः पठन्ति
तेषां शुभं करगतं सततं समस्तम् ॥ ३ ॥

---

## पाञ्चजन्यस्तुतिपञ्चकम्

धन्यस्त्वं सुकृती च पञ्चसु हरेर्दिव्यायुधेष्वेककः
यत्त्वां मुञ्चति पाञ्चजन्य ! न हरिर्हस्तस्थितं जात्वपि ।
क्षीराब्धेर्दुहितुर्मुखाब्जमधुलिण्णारायणः श्रीधरः
चुम्बन्स्त्वामपि तोषयत्यपि भवान्दुग्धाब्धिजातोऽस्ति यत् ॥ १ ॥

काठिन्येन रमाकुचावनुसरन् कण्ठं तदीयं हसन्
रूपेणानुपमेन किंच कमलादेहच्छविं निर्मलाम् ।
लावण्येन च शुक्लिमाधिकतया सम्पोषयन् सर्वतः
विष्णुं तं त्वमपीन्दिरेव सततं कम्बो ! समाकर्षसि ॥ २ ॥

सूर्याचन्द्रमसौ हरेः किल दृशौ तिग्मच्छविर्दक्षिणं
वामं नेत्रमसौ सुधाकर इति ख्यातं च तद्धेतुना ।
विष्णोर्दक्षिणवामपाणिगतयोस्तद्धेतिराट्शङ्खयोः
तैक्ष्ण्यं तावदवाप चक्रममृतं कम्बो ! त्वमासिञ्चसि ॥ ३ ॥

लक्ष्मीवक्षोजयुग्मं विरचितमकरीपत्रभङ्गाभिरामं
कस्तूर्यानिस्तुलं तत् स्पृशति सति हरौ सुष्ठु तच्चिन्हितेन ।
स्पृष्टस्तत्पाणिनासौ धवलतररुचिः पाञ्चजन्यस्तदङ्कः
भाति श्यामाद्रिवर्णो लिखितसुविलसच्चित्रकार्योऽस्ति वेति ॥

पञ्चायुधेष्वेकतमोऽसि साक्षात्
रमेव विष्णुं परिकर्षसि त्वम् ।
मोक्षप्रदश्चासि यथा मुकुन्दः
को वा स्तुतौ ते निपुणोस्ति कम्बो ! ॥ ५ ॥

तदिदं शास्त्रवचनम्—

सृष्टिबीजतया पद्मं चक्रं स्थितिनिबन्धनम् ।
गदासंहारबीजन्तु शंखं मुक्तिनिबन्धनम् ॥

## स्वामिन् प्रसीद भगवन् यदुशैलनाथ (समस्या)

वेदस्तपःफलरसं च सनत्कुमार-
संकल्पसंभृतधरातलभागधेयम् ।

श्री लक्ष्मणार्यनिरपायधनं श्रये त्वां
  स्वामिन् प्रसीद भगवन् यदुशैलनाथ ॥ १ ॥

रामानुजो यतिपतिस्सुकृती भवन्तं
  वल्मीकबद्धमवमोच्य च नः कुतोऽदात्।
एतद्विचिन्त्य परिपालय संश्रितान्नं
  स्वामिन् प्रसीद भगवन् यदुशैलनाथ ॥ २ ॥

क्षीरार्णवे सवितृमंडलमध्यभागे
  वैकुण्ठधाम्नि निवसन्तममीवयं त्वां
नेक्षामहेऽत्र कृपयासि समस्तदृश्यः
  स्वामिन् प्रसीद भगवन् यदुशैलनाथ ॥ ३ ॥

सुज्ञानिनामपि धियं त्वपिधाय माया-
  जालेन तन्निगडितान् रमसे प्रपश्यन्।
भक्तास्तवाचलधियस्तु न तेन बद्धाः
  स्वामिन् प्रसीद भगवन् यदुशैलनाथ ॥ ४ ॥

यस्त्वं परात्परतरस्सुलभःश्रितानां
  स्वातन्त्र्यतोऽपरवशोऽप्यसि भक्तवश्यः।
अर्चां च वाञ्छसि जनैरपि पूर्णकामः
  स्वामिन् प्रसीद भगवन् यदुशैलनाथ ॥ ५ ॥

भीतः प्रवाति पवनस्त्वदुदेति भीत-
  स्सूर्योनलो दहति भीत इति श्रुतेर्वाक्।
त्वां वीक्ष्य सस्मितमुखं तु वयं प्रहृष्टाः
  स्वामिन् प्रसीद भगवन् यदुशैलनाथ ॥ ६ ॥

यस्यामतं च मतमस्य मतं तु यस्य
सत्वां न वेद किल तच्छ्रुतिवाक्यरीत्या।
त्वं सोऽत्र तिष्ठसि हरे सकलैश्च वेद्यः
स्वामिन् प्रसीद भगवन् यदुशैलनाथ ॥ ७ ॥

शंखं च चक्रमभयार्पणमुद्रिकां च
बिभ्रद्गदामपि सदा निजपाणिपद्मैः।
भक्तान् पराङ्मुखजनांश्च वशीकरोषि
स्वामिन् प्रसीद भगवन् यदुशैलनाथ ॥ ८ ॥

अर्चाकृतावपि समागतभक्तवृन्दं
मन्दस्मितेन च सुशीतलवीक्षितेन।
वाचं विनैव कुशलं परिपृच्छसि त्वं
स्वामिन् प्रसीद भगवन् यदुशैलनाथ ॥ ९ ॥

मध्ये तवाङ्घ्रिसरसीरुहयोर्निषण्णां
वीक्ष्य श्रियं प्रणमनावसरेऽतिशीघ्रं।
सर्वेप्सितार्थ इह नः फलतीति विद्मः
स्वामिन् प्रसीद भगवन् यदुशैलनाथ ॥ १० ॥

नारायणाख्यपृथुके परभक्तियुक्ते
स्वल्पं कदन्नमपि तेऽर्पयति प्रसन्नः।
भुक्त्वा श्रियाऽर्पय इहास्य तु रत्नभिक्षां
स्वामिन् प्रसीद भगवन् यदुशैलनाथ ॥ ११ ॥

प्रह्लादमारुतिविभीषणविष्णुचित्त-
गोदाम्बरीषशठगोपशुकध्रुवादीन्।

भक्तानिवाच्युत समुद्धरपापिनं मां
स्वामिन् प्रसीद भगवन् यदुशैलनाथ ॥ १२ ॥

नारायणाच्युत मुकुन्द नृसिंहविष्णो
श्रीनाथ कृष्ण मधुसूदन रामशौरे ।
वैकुण्ठ केशव जनार्दन चक्रपाणे
स्वामिन् प्रसीद भगवन् यदुशैलनाथ ॥ १३ ॥

संपत्कुमार नरसिंह वराहमूर्ते
नारायण प्रकटितान्यबहुस्वरूप ।
सन्मंगलं भवतु ते गुरुभिः प्रगीतं
स्वामिन् प्रसीद भगवन् यदुशैलनाथ ॥ १४ ॥

## श्रीरामनाममहिमा

श्रीकण्ठोमुक्तकण्ठं जगदवनकृते रामनाम्नो महिम्नः
श्रेष्ठत्वं बोधयन् सन् श्रुतिशतफलितं तत्वमित्थं जगाद ।
श्रीरामं जानकीशं निरवधिकदयं सत्यसन्धं सुबन्धुं
सर्वेशं संश्रयध्वं सततमिहपरश्रेयसे भूयसे वः ॥ १ ॥

राम ! राम ! रघुराम ! राम भो ! जानकीरमण लक्ष्मणाग्रज !
आञ्जनेयभरतादिभिर्वृतं त्वामनन्यशरणोहमाश्रये ॥ २ ॥

काककङ्कशबरीविभीषणान् दाशकीशजलराशिपानपि ।
यो ररक्ष कृपयाश्रितान्नतान् तं प्रभुं सपदिराममाश्रये ॥ ३ ॥

आपन्नापद्माश्वपास्यसुखदं संश्रित्य सीतासखं
नानाक्लेशपरम्परानिवसतौ भूमाव-भूमाभयाः ।
यस्मादाश्रितरक्षणैकनिरतः कारुण्यवारांनिधि-
र्वात्सल्यार्जवमुख्यसद्गुणगणैः रामो नरामोददः ॥ ४ ॥

साकेताख्यपुरं निकेतनमिदं काकुत्स्थरूपस्य तत्
श्रीकान्तस्य सुकान्तपूतयशसः भूकन्यकाप्रेयसः ।
नाकौकः प्रमुखैस्सदा मुनिकुलैरेकान्तसेव्यं यतः
साकं सोऽनयदात्मनाखिलजनं वैकुण्ठलोकं प्रभुः ॥ ५ ॥

सरयूसरिदिह सततं
सरयं सरति च यथैव वर्षर्तौ ।
सुरनरसेवितसलिला
विमला कलयति किलाखिलं कुशलम् ॥ ६ ॥

सायोध्यैवह्ययोध्यैषा विरजा सरयू सरित् ।
लक्ष्मीनारायणौ साक्षात् सीतारामौ सनातनौ ॥ ७ ॥

अहं तवास्मीति च यो हि याचते
परं सकृन्मा प्रणतो यदृच्छया ।
ददाम्यहं तस्य किलाभयं मम
व्रतंत्विति प्राह च यो गतिस्स नः ॥ ८ ॥

मह्यं क्षोणीसुतायाः प्रणयपरिणयी कोऽपि कोदण्डपाणिः
गीर्वाणानां शरण्यो निशिचरपरिषत्खण्डनोद्दण्डकाण्डः ।
पाषाणप्राणविश्राणनचणचरणः काकशोकापहर्ता
कर्ता सेतोः पयोधौ दिशतु निजपदं रामनामाभिरामः ॥ ९ ॥

श्रीरामरामार्चितरामरामे-
त्यनारतं रामपवित्रनाम ।
केचिज्जपन्तो भुवि रामभक्ताः
वातात्मजन्ति स्वयमीश्वरन्ति ॥ १० ॥

आशरपातात्प्रथमं ज्याघोषणैव युधि स रघुरामः ।
आशरपातं चक्रे रिपुविपदेऽलं तदीयनामैव ॥ ११ ॥

## शबरीभक्तिभावः

शबरान्वयजातापि श्रमणीमुनिसंसदाम् ।
परिचर्यापरा लेभे शुद्धसत्वगुणं दृढम् ॥ १ ॥

श्रमणी रमणीयभक्तिपूर्णा
तरणेर्वंशमणौ तृणीकृतान्या ।
युगवत्क्षणमप्यवेक्षमाणा
रघुरामेक्षणकांक्षिणी कृशाभूत् ॥ २ ॥

रात्रिं दिवं रामपदाब्जवीक्षा-
कुतूहलात्तन्मयतां गतायाः ।
सद्भक्तिपाशैरिव कृश्यमाणः
रामो ययौ द्राक् श्रमणीकुटीरम ॥ ३ ॥

अत्यन्तभक्तिभरभावितचेतनायाः
स्वीयांघ्रियुग्मकमलार्चनमग्नबुद्धेः ।
बद्धो दृढं प्रणयपाशशतैश्शबर्याः
भुङ्क्ते स्म तद्विघसमप्यनघस्स रामः ॥ ४ ॥

प्रियातियोगार्तिकृशस्य तस्य
रामस्य तन्मार्गणकार्यभारे ।
चैतन्यमुत्साहयुतं शबर्याः
भुक्तोज्झितान्येव ददुः फलानि ॥ ५ ॥

मतङ्गपुण्याश्रमवासपूतां
कृताङ्गसंशोषणजीर्णकायाम् ।
पतङ्गवंशप्रभुपादभक्तां
सुतुङ्गनिश्रेयसभाजमीडे ॥ ६ ॥

## श्रीकृष्णलीला

अयि वल्लभ मां पुरेव कस्मा-
दधुना त्वं नहि चुम्बसि स्मरार्ताम् ।
महिलाहृदयापहारदक्षां
मुरलीं वादयसीह नैव कस्मात् ॥ १ ॥

पुरुषायितराधयाधरो मे
व्रणितोभूद्भ्रमभङ्गनायितस्य ।
तदहं मदिराक्षि वेणुगानेऽ
धरपानेऽस्मि तवाक्षमः क्षमस्व ॥ २ ॥

राधा द्वेधा समाराध्य माधवं स्ववशे न्यधात् ।
अतुलेनानुरागेण भक्त्याविशुद्धयापि च ॥ ३ ॥

हारक्रीडाप्रवृत्ते यदुकुलतिलके मीलिताक्षे मुकुन्दे
राधा पप्रच्छ चैनं प्रिय ! किमिह दिवाप्यद्य निद्रासि तिष्ठन् ।

निद्रा मे नैव कान्ते ! विकसय नयनं पुण्डरीकाक्ष तर्हि
प्राहेत्थं तां मुखेन्दोस्तव सितकिरणैर्मीलितं मे दृगब्जम् ॥ ४ ॥

हन्ता त्वं बत पूतनाशकटयोः वृक्षात्मगन्धर्वयोः
हर्ता शापगदस्य भूधरसमुद्धर्ताऽहिनिष्पेषकः ।
बाल्यात्त्वच्चरितं सुविस्मयकरं त्वास्तां समस्तं हरे !
यद्गोपीशतमन्दिरेषु रमसे ताभिस्त्वमेकः कथम् ॥ ५ ॥

भो वल्लभा नात्र ममास्ति कापि
प्रवृत्तिरात्मेश्वरता विभूतेः ।
शक्तिस्स्वयं भक्तजनेष्टपूर्त्यै
सृजत्यनेकाश्च तनूर्ममैवम् ॥ ६ ॥

कान्तेऽम्बरान्तः परिजृम्भमाणा
पयोधरश्रीस्सुखदा ममाक्ष्णोः ।
चैत्रेऽम्बुदः कृष्ण किमस्ति ? मेघो
नोक्तस्त्वदीयस्तनरम्यतोक्ता ॥ ७ ॥

कृष्णस्यागमनं निरीक्ष्य सुचिरं काचिद्व्रजाब्जेक्षणा
व्यर्थाशा निशि तं हठादुपगतं नीत्वापि शय्यातलम् ।
निद्राधिक्यविनष्टसङ्गमसुखा प्रातस्समीक्ष्यान्तिके
शौरिस्थानकृतोपधानमभवत्तद्वञ्चिता मूर्छिता ॥ ८ ॥

वासः कुत्र मम प्रभो ! निवस मे शय्यागृहेऽब्जानने
पृष्टं नैव मया स्थलं किमपरं शौरेम्बरं मामकम् ।
यन्नग्नासि तदम्बराम्बरवती कान्ते भृशं भासि ही-
त्युक्त्वा नन्दसुतः प्रियां परिहसन् तामालिलिङ्गाङ्गनाम् ॥ ९ ॥

# श्रीकृष्णकौमारलीला

मदालसा कापि वधूर्मुकुन्दे
सदानुरक्ताप्यनवाप्तकामा ।
निरन्तरं तत्स्मृतिसौख्यहृष्टा
परत्र तन्नित्यसमागमाभूत् ॥ १ ॥

परस्परेर्ष्यामलिनान्तरङ्गा-
स्वन्योन्यसख्यं जनयन् वधूषु ।
समानुरागस्तदभीष्टचेष्ट-
स्ता नन्दयामास स नन्दसूनुः ॥ २ ॥

वाक्चातुर्यविशेषसंस्तुतवधूवृन्दे मुकुन्दे मुहुः
विस्रब्धा व्रजयोषितस्सपदि तत्सौन्दर्यमग्नाशयाः ।
अन्तस्सन्ततचिन्तनेन च हरेस्तत्प्राप्तिकौतूहलात्
विश्वासाच्च दृढात्तदीयविरहेऽप्यापुर्मुदं शाश्वतीम् ॥ ३ ॥

कर्माणि लिम्पन्ति न मां कदापि वा
न मेऽस्ति तत्कर्म फलेऽस्पृहापि वा ।
इत्युक्तरीत्या प्रमदाशतप्रियोऽ-
प्यासीद्विरक्तश्च जितेन्द्रियो हरिः ॥ ४ ॥

परात्पर इति श्रुतोऽप्यतितरां स्वतन्त्रोऽप्यसौ
स्वभक्तजनचित्तवृत्त्यनुगुणं स्वकर्माचरन् ।
क्वचिच्च निजमायया विरचयन् श्रितान् वञ्चितान्
हरिर्व्रजवधूजनं विविधलीलयाऽतोषयत् ॥ ५ ॥

एकः कृष्णो गोपकन्यासहस्रं
चैकैकस्याः पार्श्वगः प्रीणयंस्ताः ।
सौन्दर्ये स्वे भिन्नभिन्नस्वरूपै-
स्तासां चित्तं क्षोभयामास मायी ॥ ६ ॥

मय्यासक्तमनाः न चापरवधूष्वेवं हरिः प्रीतिमान्
इत्येवं सकलाङ्गनासु जनयन् बुद्धिं हरिश्चाटुवाक् ।
स्वोत्कृष्टत्ववचः प्रसक्तकलहैः रुष्टस्समाश्वासयन्
शाठ्यं स्वस्य वदन्नयाचत पराभूतः क्षमां वल्लवीः ॥ ७ ॥

कुञ्जेऽस्मिन् भव भोः प्रिये! त्वमधुना सर्वा प्रतार्याङ्गना
आगच्छामि भवत्सकाशमिति ताश्शौरिर्वधूर्वञ्चयन् ।
राधासङ्गसुखप्रमोदरसिकः पश्चाच्चिरादेत्य ताः
नीतोऽहं पशुपालनाय विपिनं मित्रैरिति प्रच्युतः ॥ ८ ॥

## श्रीकृष्णस्य सर्वोत्कृष्टत्वम्

असर्पभोगशयनैरसर्वामरपूजितैः ।
अकारुण्यार्णवस्वान्तैरगूढपरतागुणैः ॥ १ ॥

अदेवकीजठरजैरसभूषणजन्मभिः ।
अनन्दगोपाश्रयणैरयशोदास्तनन्धयैः ॥ २ ॥

अजग्धमृत्स्नावक्त्रान्तःप्रदर्शितजगत्त्रयैः ।
अपूतनासंहरणैरध्वस्तशकटासुरैः ॥ ३ ॥

अकेशिधेनुकव्योममुष्टिकासुरमर्दनैः ।
अकंसनरकारिष्टशिशुपालप्रमाथिभिः ॥ ४ ॥

अकालीयफणानृत्तैरगोपीजनजीवितैः ।
अगोरक्षणनिष्णातैरगोवर्धनधारिभिः ॥ ५ ॥

असृष्टवसनव्रातद्रौपदीमानरक्षकैः ।
अतृप्तविदुरातिथ्यैरविश्वाकृतिधारिभिः ॥ ६ ॥

अप्रदर्शितदुष्प्रेक्ष्यविश्वरूपात्मवैभवैः ।
अस्वाश्रितजनस्तोमदृगासेचनकाङ्कैः ॥ ७ ॥

अपार्थरथसारथ्यकृतपाण्डवपालनैः ।
अगीतोपनिषद्बोधैरकर्मफलनिस्पृहैः ॥ ८ ॥

अमुष्टिचिपिटप्रीतैरकुचेलेष्टदायकैः ।
असर्वतीर्थचरणैरपवित्रात्मनामभिः ॥ ९ ॥

अजगद्रक्षणासक्तिदशाकृतिपरिग्रहैः ।
अलसैरसमर्थैस्तैरलंदेवैस्तु नः परैः ॥ १० ॥

शौरे चिरालिकुचदाडिमनारिकेल-
कुम्भाद्रिभारवनितौघकुचान् प्रयत्नैः ।
बिभ्रत्क्रमेणगिरिधारणलब्धशक्तिः
गोवर्धनाद्रिमवहः किमु तत्र चित्रम् ॥ ११ ॥

श्रीवत्सवक्षो वसुदेववत्सो
महत्सु सत्सूत्सवकृत्सुहृत्सु ।
वात्सल्यवान् कृत्स्नजगत्स्वरूपः
विपत्समुत्सारणकृत्सदास्तु ॥ १२ ॥

## पूतनामा

पुरा पिपासुः परिपीड्यपूतना-
पयोधरौ यः पृथुकः पयः पपौ ।
परात्परः पापपरम्परापहः
स पातु नः पावनपादपङ्कजः ॥ १ ॥

पूतना स्वस्तनक्षीरं विषाक्तमपि शौरये ।
दत्वा प्रापामृतं क्षिप्रं दुर्लभं तत्कृपावशात् ॥ २ ॥

स्वस्तन्यं देवकी नैव ददौ कृष्णाय सूनवे ।
ततस्तस्यास्तनौ व्यर्थौ पूतनायास्तु सार्थकौ ॥ ३ ॥

असुराप्यसुरक्षाशां विना प्राप्य शिशुं हरिम् ।
दत्वोपहारं स्वस्तन्यं तस्मै मोक्षं क्षणाद्ययौ ॥ ४ ॥

पूतनायास्तनौ वन्दे भवभीतिहरौ चिरात् ।
चुम्बितौ बालकृष्णेन यौ तस्या मोक्षदायकौ ॥ ५ ॥

प्रवर्तते यस्य वाचि पूतनामरता कथा ।
स पूतनामा रमते श्रीकृष्णचरिते सदा ॥ ६ ॥

## भगवद्विषयकश्लोकाः

भक्तानुरक्तोऽद्भुतशक्तियुक्तो
मुक्तिप्रदो व्याप्तमहत्वयुक्तः ।
अव्यक्तसुव्यक्ततरात्ममूर्तिः
तत्वप्रवक्तावतु नस्स नित्यः ॥ १ ॥

संरक्ष्य मामप्यधमं स्वशक्तिं
स्पर्धाविधौ दर्शयतो विजेतुः ।

हरेरहं तादृशनित्यदास्यं
कुर्वन् स्तुवन् तं बहुमानयामि ॥ २ ॥

सर्वेन्द्रियाणां मनसश्च बुद्धेः
बलस्य सत्वस्य धृतेश्च धाम्नः ।
श्रीवासुदेवात्मकतां किलाहुः
तन्मत्कृतीनां हरिरेव कर्ता ॥ ३ ॥

फणिपरिबृढमञ्चं व्याप्तसर्वप्रपञ्चम्
सदयहृदयमापद्बान्धवं माधवं त्वाम् ।
धृतदशविधरूपं ध्वस्तभक्तोग्रपापं
हरिमणितनुभासं संश्रये श्रीनिवासम् ॥ ४ ॥

सकलनिगमसारं पूर्णकारुण्यपूरम्
मुनिजनहृदगारं तामसानां सुदूरम् ।
असदृशरणधीरं भूमिकन्याविहारम्
रघुवरमिह वारं वारमीडे प्रवीरम् ॥ ५ ॥

कलशजलधिगेहं सल्लसद्दीर्घबाहुं
हृतनतजनमोहं दिव्यपक्षीन्द्रवाहम् ।
जलदरुचिरदेहं निस्स्वनद्गोसमूहम्
पदमृदितमहाहिं श्रीहरिं संश्रयेऽहम् ॥ ६ ॥

करतलधृतवेणुं प्रस्फुरच्चक्रपाणिम्
रिपुवधचणबाणं भक्तरक्षाप्रवीणम् ।
भुजबलजितबाणं पूतपादब्जरेणुम्
शरणमिह पुराणं त्वां वृणेऽनुक्षणं च ॥ ७ ॥

जलधिदुहितृवक्षाः भक्तरक्षैकदीक्षः
निहतसुरविपक्षः पुण्डरीकायताक्षः
श्रितसुरपतिपक्षश्चार्थिनां कल्पवृक्षः
स दिशतु मम मोक्षं त्वन्यदैवानपेक्षम् ॥ ८ ॥

## प्रार्थना

अपरिमितं मम दुरितं तव चरितं हृदि न कृतम् ।
भुवनपते त्वमवनतं कुरु सततं मां मुदितम् ॥

## भगवत्समाश्रयणम्

सर्वत्रास्ति प्रभुर्विष्णुः सर्वत्राता दयानिधिः ।
नम तं चेच्छुभाकांक्षी न मतं कस्य मद्वचः ॥ १ ॥

उच्चरामुष्य नामान्यप्युच्चरावेण मानव ।
अच्युतं पदमीप्सुश्चेदच्युतस्य पदं श्रय ॥ २ ॥

जननप्रलयौ रे रे जन ! न त्यजतोखिलान् ।
विनाशाशा तयोर्नैव विना शार्ङ्गभृतः कृपाम् ॥ ३ ॥

कंसहन्ता वासुदेवः कं स हन्ताश्रितं त्यजेत् ।
साधुस्तस्याश्रयस्तस्मात्साधुस्तस्याश्रयोत्सुकः ॥ ४ ॥

## देवाधीनं जगत्सर्वं

सुखं वा दुःखं वा भवति भवतश्शासनबलात्
न ते सङ्कल्पस्स प्रतिहतिमुपैति क्वचिदपि ।
इदं तत्वं कृत्वा मनसि सुदृढं दुःखसुखयोः
समानान्तर्वृत्तिर्मुरहर भजे त्वामशरणः ॥ १ ॥

क्षणं बालो भूत्वा क्षणमथ युवा तत्क्षणमहो
जराजीर्णैरङ्गैः प्रशिथिलतनुर्भृत्यवशगः ।
मुहुर्भूयो भूयो जननमरणक्लेशदलितः
कदा जीवात्मन् यास्यस्यमृतमिह संश्रित्य नृहरिम् ॥ २ ॥

श्रीनाथ त्वमनेकयोनिषु जनिं मे दातुकामो यदि
स्वैरं मां सृज हानिरत्र न हि मे याचे परं त्वामिदम् ।
भीष्माचार्यय मां प्रभो विदुरय प्रह्लादय व्यासय
त्वं रुक्माङ्गदयाञ्जनेयय तथा कौन्तेययाक्रूरय ॥ ३ ॥

## श्रीरामसुप्रभातम्

कौसल्यावरपुत्र ! राम ! भगवन्नुत्तिष्ठपूर्वाधुना
सन्ध्या प्राप्तवती हि दैवकर्मितः कर्तव्यमत्राह्निकम् ।
इत्थं प्राह स कौशिको मुनिवरो मन्त्रात्मकं तद्वचः
संयोज्याहमपीह वच्मि शयनादुत्तिष्ठ पत्न्या सह ॥

इति पठति हनूमान् प्रत्यहं कल्यकाले
जनकदुहितृयुक्तं राममुद्बोधयन् सन् ।
पवनतनयगीतां सुप्रभातस्तुतिं ताम्
रघुपतिरवकर्ण्योत्तिष्ठति द्राक् ससीतः ॥

किं करवाणीति भृशं शङ्कितवान्स्तात संसृतेर्मा भैः ।
अङ्कुरिता परमहिता शङ्करवाणीह राम रामेति ॥

## अवतार पञ्चकम्

हिरण्याक्षहृतां पृथ्वीं हिरण्याम्बरवान् हरन् ।
भूदाररूपोयोभूत्तं भूदारं भावयाम्यहम् ॥ १ ॥

प्रह्लादं रक्षितुं वत्सम् प्रह्लादं यस्य तां ददत् ।
अभवन्नरसिंहोऽङ्गमभवं मां करोतु सः ॥ २ ॥

दानवारिर्बलेर्यज्ञे दानवारियुताङ्गुलिः ।
समेधमानो योऽभूत्स्यात्स मे धर्ममतिप्रदः ॥ ३ ॥

आराद्धनुर्धरं राममाराधय दयानिधिम् ।
परमन्त्रात्मकामिख्यं परमं त्रासभञ्जकम् ॥ ४ ॥

व्रजगोपालकं कृष्णं व्रजगोपाङ्गनाप्रियम् ।
निहत्याशु हि यश्शत्रून्निहत्यान्पर्यपात्सतः ॥ ५ ॥

## आर्ति स्फूर्तिः

न मे भक्तिर्ज्ञानं प्रपदनमतिश्चास्ति भवतः
पदाम्भोजे किंचित्क्वचिदपि वराकस्य कुमतेः ।
चिरं संसाराब्धौ मुहुरपि निमज्यास्मि दलितः
हरे विष्णो कृष्णाच्युत मम भव श्रीश शरणम् ॥ १ ॥

श्रुतं गीताभाष्यं मुहुरपि सदाचार्यसविधे
तथा श्रीभाष्यं च द्रविडवरवेदान्तवचसम् ।
किमेतैर्वा मे स्यात् कलुषमलधिग्धस्य कुधियः
प्रयत्नो वैराग्ये मुहुरपि कृतोऽयं च विफलः ॥ २ ॥

संसारघोरविपदाग्रसितो भयार्तः
सत्यं ब्रवीमि हृदि दुस्सहदुःखदग्धः ।
दीनं त्वदंघ्रिशरणं दयया मुकुन्द
वैकुण्ठधाम्नि कुरु मां तव दासदासम् ॥ ३ ॥

## भक्तिद्वयी

अक्रूरवद्विरदुवद्दधिभाण्डवद्वा
मालानिबन्धकमिवाथ कुचेलवद्वा।
कुब्जामिवांबुजविलोचन वासुदेव
मामप्यमोघकृपयोद्धर दीनमज्ञम् ॥ १ ॥

सांसारिकव्यवहृतौ सततं प्रवृत्तः
नैव स्मरामि भगवन्क्षणमप्यहो त्वाम् ।
संपूर्णवार्धकभावमिह रोगखिन्नः
संरक्षणीय इह भो भवतैव दीनः ॥ २ ॥

## द्रौपदीमानसंरक्षणम्

नारीमानहृतौ मतिर्नरपतेर्दुर्योधनस्येदृशी
भीष्मद्रोणमुखेषु साधुषु तदा मौनं विगर्ह्यं तथा ।
क्लैब्यं भर्तृषु चाग्रतो द्रुपदजा भक्तिं हताशैश्वरीं
लोके दर्शयितुं नृणामुदभवन्नूनं ममैवं मतम् ॥ १ ॥

सपदि विपदि मग्ना तादृशी द्रौपदी सा
परमपुरुषमेव प्रार्थयामास भक्त्या ।
व्यसननिरसनार्थं वाससां राशिमस्याः
व्यसृजदसदृशं द्राक् वासुदेवः प्रसन्नः ॥ २ ॥

## श्रीकृष्णार्घ्यमन्त्रः

ज्योत्स्नांपते नमस्तुभ्यं नमस्ते ज्योतिषां पते
नमस्ते रोहिणीकांत सुधाकुम्भ नमोस्तु ते ॥

क्षीरोदार्णवसंभूत अत्रिगोत्रसमुद्भव ।
गृहाणार्घ्यं मया दत्तं रोहिण्या सहितो मुदा ॥
रोहिणी सहिताय चन्द्राय इदमर्घ्यं ॥ त्रिः ॥

जातः कंसवधार्थाय भूभारोत्तारणाय च ।
पाण्डवानां हितार्थाय दैत्यानां निधनाय च ॥
कौरवाणां विनाशाय धर्मसंस्थापनाय च ॥
देवकीनन्दनाय श्रीकृष्णाय इदमर्घ्यं ॥ त्रिः ॥

कृष्णं च बलभद्रं च वसुदेवं च देवकीं ।
नन्दगोपं च गोपं च सर्वेभ्योऽर्घ्यं निवेदयेत् ॥
देवकीनन्दनाय श्री कृष्णाय इदमर्घ्यं ॥ त्रिः ॥

## श्री देवराजगिरिस्थित श्रीमन्नृसिंहसुप्रभातम्

श्री देवराजगिरिदुर्गमनोज्ञशृङ्ग-
प्रासादवासरसिकाश्रितपारिजात ।
योगासनस्थरुचिरस्फुरदुग्रदंष्ट्र
श्रीमन्नृसिंह भगवन् तव सुप्रभातम् ॥ १ ॥

स्वामिन्तरक्षुवृकजंबुकखड्गिघोणि
शाखामृगादि मृगसन्ततिरत्रगोत्रे ।
सान्वाश्रिता कथयतीव मृगेन्द्रतां ते
श्रीमन्नृसिंह भगवन् तव सुप्रभातम् ॥ २ ॥

सद्यः प्रफुल्ल सुमशाखि लताश्च कल्ये
शाखाश्रिताण्डजमृदुस्वनरूप सूक्त्या ।
त्वां बोधयन्ति किल पुष्पमपि प्रकीर्य
श्रीमन्नृसिंह भगवन् तव सुप्रभातम् ॥ ३ ॥

वज्रायुधाधिकसुतीक्ष्णनखाग्रदीर्ण-
वक्षो हिरण्यकशिपोस्तव दानवारेः ।
हस्तौ विभूषयितुमेव हि शङ्ख चक्रे
श्रीमन्नृसिंह भगवन् तव सुप्रभातम् ॥ ४ ॥

स्वामिन् हरे प्रियतमो गिरिरेष नित्यं
लक्ष्म्या विहारनिरतस्य तवेति मत्वा ।
ज्योतिर्लताः विदधते निशि दीपसेवां
श्रीमन्नृसिंह भगवन् तव सुप्रभातम् ॥ ५ ॥

प्रह्लादमात्मपितुनिर्मितघोरपीडा
प्रम्लानमेनमभिरक्षितुमेव भक्तम् ।
स्तंभोद्भवो हतरिपुस्त्वमपालयस्तं
श्रीमन्नृसिंह भगवन् तव सुप्रभातम् ॥ ६ ॥

वक्षो हिरण्यकशिपोर्नखरैः कठोरैः
भित्वाथ तान् तदसृजैव निषिच्य सम्यक् ।
वक्षःश्रियो मृदुनखांगुलिभिर्हि धन्से
श्रीमन्नृसिंहभगवन् तव सुप्रभातम् ॥ ७ ॥

लक्ष्मीमुखाम्बुरुह बिम्बफलाधरं त्वं
पातुं सुधां रसिकशेखरकामुकाग्रयः ।
पञ्चाननोसि किलते चरितं विचित्रं
श्रीमन्नृसिंह भगवन् तव सुप्रभातम् ॥ ८ ॥

सिम्हासनस्य तव केसरपङ्क्तिरेषा
वक्षोच्चरोधकविहारपरेन्दिरायै ।
क्लृप्तासिकायवनिकेव भृशं विभाति
श्रीमन्नृसिंह भगवन् तव सुप्रभातम् ॥ ९ ॥

सूर्योऽपि पूर्वगिरिशृङ्गगतस्तवाद्रौ
व्याप्तं तमोऽवकरराशिमपास्य सम्यक् ।
संशोधयत्युषसि भोः करमार्जिनीभिः
श्रीमन्नृसिंह भगवन् तव सुप्रभातम ॥ १० ॥

सोऽयं गिरिर्बहुविधाद्भुतमूलिकाढ्यः
वैद्योहरिर्भवरुजस्तनुरोगहाऽहम् ।
इत्थं स्वशक्तिमिह सार्थयति प्रजानां
श्रीमन्नृसिंह भगवन् तव सुप्रभातम् ॥ ११ ॥

सर्वत्र चन्दनतरुप्रकरेऽत्र भूध्रे
तत्काष्ठदीपनविधौ शबरांगनास्ताः ।
जातेन धूमनिवहेन सुधूपसेवां
कुर्वन्ति ते नरहरे तव सुप्रभातम् ॥ १२ ॥

देवराजदुर्गशृङ्गरम्यमंदिरान्तरे
शाश्वतीं श्रियं विशालवक्षसा वहन्सदा ।
त्वं समाश्रितानवन् नृसिंहरूपभाक् प्रभो
राजसे भृशं मुकुन्द तुभ्यमस्तु मङ्गलम् ॥ १३ ॥

## राघवेन्द्रगुरुवर्यस्तोत्रम्

मन्त्रालयान्तस्थपवित्रवन्द्य
वृन्दावनान्तस्तप आचरन्तम् ।
श्रीराघवेन्द्रार्यगुरूत्तमं तं
भक्त्याऽर्चयाम्यच्युतपादभक्तम् ॥ १ ॥

सुज्ञानैकनिधिर्दयाजलनिधिर्वैराग्यभाग्योदधिः
पूताचारविचारचारुचरितः श्रीकृष्णभक्तोत्तमः ।

सीतराममरुत्सुतप्रियनिजस्वान्तश्च शान्त्याश्रितः
सर्वान् रक्षतु राघवेन्द्रगुरुराडस्मान्स्वपादाश्रितान् ॥ २ ॥

वन्दे वृन्दावनान्तस्थं राघवेन्द्रं गुरूत्तमम्
सीतारामाञ्जनेयानां सद्म तस्य हृदम्बुजम् ॥ ३ ॥

प्रह्लाद त्वां पितृकृतमहापीडयाऽऽपन्निमग्नं
श्रीशस्तम्भान्नरहरिवपुर्द्रागुपेत्याभ्यरक्षत् ।
श्रीशादेशादिह कलियुगे सर्वलोकावनार्थम्
जातस्सत्वं शुभकरतनुः राघवेन्द्राभिधानः ॥ ४ ॥

मारुतेर्भीमसेनस्य क्रमादंशसमुद्भवः ।
राघवेन्द्राभिधाऽऽचार्यः स्थिरकीर्तिर्विराजते ॥ ५ ॥

आचार्यवर्यभगवन्नयि राघवेन्द्र
वृन्दावनान्तरुपविश्य जगत्समस्तम् ।
पश्यन् भवत्पदसरोरुहमाश्रितानां
दुःखान्यपोह्य सततं शुभमातनोति ॥ ६ ॥

यथाश्रितान् पासि निरस्य दोषान्
विचित्रमाहात्म्यनिधेऽखिलेड्य ।
तथैव नास्तिक्यहते जनौघे
भक्तिं दयां धर्मधियं निधेहि ॥ ७ ॥

राघवेन्द्र ! सदाचार्य ! वृन्दावननिकेतन ।
सदा भक्तावने सक्तः कदार्चसि रमापतिम् ॥ ८ ॥

अथवाद्भुतशक्तेस्ते किमशक्यं महात्मनः ।
राघवेन्द्र त्वयार्च्यस्सन् त्वदधीनेऽस्ति माधवः ॥ ९ ॥

राघवेन्द्रगुरुवर्य दयालो विस्मयावहमहामहिमाढ्य ।
स्वागतं प्रतिगृहं तव भक्ताः कुर्वते वससि सर्वगृहेषु ॥ १० ॥

म्लेच्छैः कृतामनुचितामपि तां सपर्यां
पूतां तपोबलवशात् विरचय्य सद्यः ।
स्वीकृत्य तान् स्वमहिमातिशयेन वश्यान्
योऽसौ चकार तमहं गुरुवर्यमीडे ॥ ११ ॥

असह्याननिवार्यांश्च रोगान् त्वत्पादसेविनाम् ।
क्षणान्निवार्य तेषां त्वमारोग्यं च ददास्यहो ॥ १२ ॥

श्रीराघवेन्द्रगुरुवर्यमणेः पवित्रम्
चित्रं चरित्रमनघं भुवि कीर्तयन्तः ।
सर्वैरघैरपि गुरोः कृपया विमुक्ताः
लोकेऽत्र सौख्यमनुभूय च यान्ति मुक्तिम् ॥ १३ ॥

सीतारामाञ्जनेयानस्त्वं बिभर्षि हृदि भो गुरो ।
बिभर्मि त्वामहं चित्ते ततस्त्वत्तोप्यहं महान् ॥ १४ ॥

जयतु जगति द्वैतं तत्वं हरेः परतापरं
जयतु विभवोत्कर्षः श्रीराघवेन्द्रगुरूत्तमः ।
विविधचरितैरेतन्माहात्म्यमप्यभिवर्धतां
तदमलपदासक्ताः भक्ता जयन्तु बुधोत्तमाः ॥ १५ ॥

स्वप्ने प्रसन्नस्य गुरोरमुष्य कृपावशात् तेन कृताभ्यनुज्ञः ।
चकार जग्गूत्तमशिङ्गरार्यः स्तोत्रं तदीयं गुरुभक्तियुक्तः ॥ १६ ॥

# वेदपादस्तवः

श्रीशं श्रीयदुशैलेशं वेदपादावतंसितैः ।
पद्यैस्स्तोष्याम्यहं देवं दीर्घायुत्वाय वर्चसे ॥ १ ॥

यादवाद्रीश ! भवतो गुणगुम्भनगौरवात् ।
श्रोतृचित्तमुदे दोग्ध्र्यो माध्वीर्गावो भवन्तु नः ॥ २ ॥

नारायणांघ्रियुगलि ! मणिमञ्जीरसेविते ।
श्रिया संवाह्यमाने त्वं शिवानश्शान्तमा भव ॥ ३ ॥

परमैश्वर्ययुक्तत्वाद्वेदानामुपदेशतः ।
तनोतु यादवाद्रीशश्शन्न इन्द्रो बृहस्पतिः ॥ ४ ॥

अग्रं नयति यो देवो नारायण इतीरितः ।
वेदान्तवेदिभिर्नित्यं सोऽग्निर्नः पातु कृत्तिकाः ॥ ५ ॥

तं नतोऽस्मि जगद्योनिं नारायणमनामयम् ।
यतस्सिसृक्षोर्जीवानि मनस्सर्वेन्द्रियाणि च ॥ ६ ॥

तमेमि शरणं श्रीशं नित्यं नारायणेति च ।
यन्नामकीर्तनाज्जाता जिह्वा मे मधुमत्तमा ॥ ७ ॥

यो वेद वाचामपि मुख्यवाच्यो यतस्सुराचार्यकमाप जीवः ।
सोऽयं यदुक्ष्माभृदधीश आद्यो बृहस्पतिर्नः परिपातु पश्चात् ॥ ८ ॥

समस्तकल्याणगुणात्मकान्तं श्रीशं यदुक्ष्माभृदधीशमेव ।
आचार्यवीक्ष विभवैः किलाद्य वेदाहमेतं पुरुषं महान्तं ॥ ९ ॥

मध्येसमुद्रं धृतमत्स्यरूपो ह्यन्विष्य वेदं यदुशैलनाथ ।
तेनाभवत् ज्ञाननिधिर्विधाता धाता पुरस्ताद्यमुदाजहार ॥ १० ॥

मन्थानमद्रिं जलधौ निमग्नं नारायणस्तेनहि निर्जरौघः ।
पपौ सुधां तां कमठाकृतिस्सन् धाता पुरस्ताद्यमुदाजहार ॥ ११ ॥

नतोऽस्मि यदुशैलेशं दंष्ट्रया क्रोडरूपिणा ।
उद्धृताभून्मही येन कृष्णेन शतबाहुना ॥ १२ ॥

नारायणस्सर्वग एव सर्वरूपीति भक्तोक्तमृतं च कुर्वन् ।
स्तम्भाद्भजेतं नरसिंहवेषं धाता पुरस्ताद्यमुदाजहार ॥ १३ ॥

नारायणोऽसौ बलियज्ञवाटे धाराजले हस्तगते तदैव ।
दातुर्यशोराशिरिव प्रवृद्धो नाकस्य पृष्ठे महतो महीयान् ॥ १४ ॥

नारायणो दाशरथित्वमेत्य समुद्रतीरे कपिवीरगोष्ठ्याम् ।
मां पातु सोऽयं सकृदेव मन्त्रं धाता पुरस्ताद्यमुदाजहार ॥ १५ ॥

श्रियः पतिः श्रीयदुशैलनायको गुणत्रयातीतविशुद्धधामवान् ।
तथापि भक्तार्तिहरः कृपावशात् अजायमानो बहुधा विजायते ॥ १६ ॥

भजाम्येनं यदुशैलाधिनाथं पुरा देवासुरयुद्धे प्रवृत्ते ।
उपेन्द्रेण प्रहरन् येन नाके शतं सेना अजयत्साकमिन्द्रः ॥ १७ ॥

यदुद्रौ श्रीशकैङ्कर्यभाग्योऽत्र नियतं वसन् ।
उभौ मन्ये समौ यश्च गच्छेद् ब्रह्म सलोकताम् ॥ १८ ॥

मन्त्ररत्नाभिधा या वै नारायण जगद्गुरो ।
नवाक्षराधिका सा मे षोडशी शर्म यच्छतु ॥ १९ ॥

श्रीशोद्धृतदरारिभ्यां अभयाद् गदयापि च ।
निवारितदरारिभ्यां बाहुभ्यामुत ते नमः ॥ २० ॥

इत्थं मया कृतामेनां वेदपादस्तुतिं हरिः ।
अङ्गीकरोतु कृपया यदुद्रीशो रमापतिः ॥ २१ ॥

बालधन्विकुलोद्भूतशिंगरार्यकवेः कृतिः ।
वेदपादस्तवो भद्रं वितनोतु सुखं शुभम् ।।

# वेद्वेदान्त बोधिनी प्रशस्तिः

धात्रा सनत्सुतमुखैः परिपूजितांघ्रिः श्रीराघवेण वसुदेवभुवार्चितश्च ।
नारायणो वसति यत्र रमासमेतो वैकुण्ठधाम्नि विरुचिः कृपयाऽप्रमेयः ।।

अष्टोत्तरान्वितशतोत्तमदिव्यदेशेष्वत्यन्तसारतम इत्यभिधीयते यः ।
यत्राष्टतीर्थपरिपूतसरांसि भान्ति गोमन्तपर्वत इति प्रथितश्च योऽभूत् ।।

यं दाक्षिणबदरिकाश्रममामनन्ति वैकुण्ठवर्धनपवित्रभुवं यमाहुः ।
श्वेतान्तरीपगतशुक्लमृदं गरुत्मानानीय यत्र निदधे हरिभक्तधार्यम् ।।

यस्याचलस्य शिखरे नरसिंहमूर्तिर्योगासने समुपविश्य महान् मुकुन्दः ।
भक्ताभिलाषपरिपूरणजागरूकः प्रह्लादकल्पितचिरस्थितिमान् विभाति ।।

रामानुजार्यविजयोज्ज्वलकीर्तिभास्वत् स्थानं यमाहुरभिजातबुधाश्रयो यः ।
सोऽयं विभाति भुवि सात्विकवैष्णवानामावासभूर्यदुगिरिः परमप्रकृष्टः ।।

प्रख्यातविद्वदवतंसवरैः प्रपूर्णे तादृक्स्थलेऽत्रवरसंस्कृतपाठशाला ।
षड्दर्शनाध्ययनसक्तमतीन् कृतार्थान् प्राज्ञोत्तमान् विदधती सुचिराद्विभाति।।

शास्त्रेषु निष्कृष्टधियो महान्तः विपश्चितश्शिष्यहितैकसक्ताः ।
अध्यापकाः कीर्तिधना इमां ताम् श्रद्धान्वितास्संपुपुषुस्सुशालाम् ।। ७ ।।

कुप्पण्णार्याः पण्डिताग्रेसरास्ते ताताचार्याः कोविदाः वेङ्कटार्याः ।
आसन्नन्ये नारणार्यादयोऽत्र प्रख्याताश्चाध्यापका माननीयाः ।। ८ ।।

बाल्याद्येऽध्ययनेरताः कुतुकिनस्तानेष विद्यालयः
विद्यासंपदुदारबुद्धिविभवान् शान्तात्मवृत्तांस्तथा ।
दिग्योषिद्विशदां शुकायितयशोराशीन् वितन्वन्श्चिरात्
निष्प्रत्यूहगतिश्शते हि शरदां संप्रत्युपैत्युत्सवम् ॥ ९ ॥

भव्योत्सवेनखदुदर्कमितः परं स्यात् विद्यालयस्य महतोऽस्य शताब्दभाजः ।
इत्थं हरिं यदुगिरीशमनन्यभक्त्या याचाम यत्किल परिस्थितिरस्य तादृक् ॥

## गरुडस्तुतिः

वैनतेय खगराज गरुत्मन्
विष्णुवाह गरुडाच्युतकेतो !
स्वर्णकान्ततनुवर्ण सुपर्ण
श्रुत्यभिन्नवपुषेऽस्तु नमस्ते ॥ १ ॥

अमृताहरणेन मातृबन्धं
परिमोच्याखिल वैरिमर्दनेन ।
प्रथितात्मयशोविशाल ताक्ष्र्या-
श्रितरक्षाधिकदक्ष रक्ष मां च ॥ २ ॥

हरेर्मनोवेगमपि स्ववेगै-
र्विजित्य विष्णोरखिलक्रियासु ।
सहायको योऽस्ति सहेय दोषान्
ममापनोद्यावतु मां गरुत्मान् ॥ ३ ॥

इन्द्रजिन्मुक्तसर्पास्त्रबद्धौ तौ रामलक्ष्मणौ ।
यत्प्रभावेन विपदो मुक्तौ तं ताक्ष्र्यमाश्रये ॥ ४ ॥

# वन्दे तां परदेवताम्

शेषिशेषाविशेषेण विशेषेण च तद्द्वयोः ।
अविभक्तां विभक्तां च वन्दे तां परदेवताम् ॥ १ ॥

नानारूपामरूपाञ्च बहुनाम्नीमनामिकाम् ।
दुर्लभां सुलभां नित्यां वन्दे तां परदेवताम् ॥ २ ॥

अजायमानां बहुधा जायमानां तदा तदा ।
विरक्तां बहुरक्तां च वन्दे तां परदेवताम् ॥ ३ ॥

अणोरप्यणुरूपां च महतोऽपि महीयसीम् ।
ज्ञानगम्यामप्रमेयां वन्दे तां परदेवताम् ॥ ४ ॥

अन्योन्यातिविरुद्धैस्तैः स्वभावैश्चित्रचेष्टितैः ।
लीलाव्यापारनिरतां वन्दे तां परदेवताम् ॥ ५ ॥

पात्राकारानुरूपेण यथाम्भस्तत्र तिष्ठति ।
तथा तिष्ठति सर्वेशः भावनानुगुणं हृदि ॥ ६ ॥

# सप्तविभक्तिकः श्लोकः

त्राता मुकुन्दः कलये मुकुन्दं
सृष्टं मुकुन्देन जगत्समस्तम् ।
नमो मुकुन्दाय सुखं मुकुन्दात्
दासो मुकुन्दस्य रमे मुकुन्दे ॥ १ ॥

अथवा तव दूषणेन मह्यं
नहि दोषोऽस्ति परं तु पुण्यमेव ।
तव निन्दकमाशु कृष्ण हत्वा
शिशुपालस्त्वमदाः किलास्य मोक्षम् ॥ ३ ॥

शिशुपाल इवाहमप्यनिन्द्यं
वरकल्याणगुणार्णवं भवन्तम् ।
कलयन्नतिकोपनं कुवाग्भिः
प्रयते मुक्तिमवाप्तुमच्युताद्य ॥ ४ ॥

## भगवन्महिमा

गुणांस्ते व्याख्यातुं परमपुरुषात्यद्भुतगुण-
प्रवृत्ता साकल्यात् श्रुतिरपि तलस्पर्शिवचनैः ।
तदीयैकैकांशेष्वणुतरविचारेऽपि बहुशः
परब्रह्मन् श्रान्ता तदतुलमहिम्ने मम नमः ॥ १ ॥

बिभर्षि ब्रह्माण्डान्युदरकुहरे तेष्वणुतरे
तथान्तर्यामी त्वं बहिरसि सुदूरेऽपि च ततः ।
स्वतन्त्रस्सर्वेशस्तदपि करुणायत्तहृदयः
वचोऽतीतानन्ताद्भुततरमहिम्ने मम नमः ॥ २ ॥

स्रष्टुस्स्रष्टाऽस्यन्तकोऽप्यन्तकस्य
प्राक्चप्राञ्चामात्मनामन्तरात्मा ।
ईशस्येशः कारणं कारणानां
कस्साकल्याद्वेत्ति नारायण त्वाम् ॥ ३ ॥

श्रीवत्साङ्क चतुर्भुजाब्जनयन प्रावृट्पयोदद्युते
पत्रीशध्वज पद्मनाभ परमव्योमाधिवास प्रभो ।

भक्तापञ्चपनोदनव्रतलसत्पञ्चायुध ! श्रीपते
कारुण्यामृतवर्षमत्रभवतो याचेऽतिनीचक्रियः ॥ ४ ॥

## भगवति प्रार्थना

दास्येनार्चनतः स्तवेन तपसा ध्यानेन भक्त्याश्रयात्
सख्येनाप्यनुरागतोऽपि च भिया वैरेण बान्धव्यतः ।
धन्यास्ते कतिचिन्मुकुन्द नृहरे नारायण त्वां सदा
संसेव्य ह्यनयन् स्वकं वशमहो कुत्रापि शक्तिर्न मे ॥ १ ॥

दुरितहतविवेकस्तेर्चने निस्पृहोऽहं
तदभवमपराधी स्वीयकर्तव्यहानात् ।
मदवनविमुखश्चेत् त्वं दयालुश्च शक्तः
मुरहर तवदोषो मेऽपराधान्महीयान् ॥ २ ॥

नाभौ सरोजं तटिनी पदाब्जे
करे रथाङ्गं विपुलोरसि श्रीः ।
स्वापे भुजङ्गो गमने विहङ्गो
यस्यास्ति नः पातु परात्परस्तः ॥ ३ ॥

करे धनुर्वर्मणि चीरवासः
शीर्षे जटाऽनर्घकृपान्तरङ्गे
गार्हस्थ्यधर्मे जनकात्मजैका
सख्ये कपिर्यस्य स पातु रामः ॥ ४ ॥

मयूरपिञ्छैः कलितावतंसो
गुञ्जाफलैः कल्पितकण्ठभूषः ।

पीताम्बरः पाणितलस्थवेणुः
गोपीप्रियो योऽवतु नस्स कृष्णः ॥ ५ ॥

मुनयोऽपि जितेन्द्रियास्सुरूपं
रघुरामस्य विलोक्य मोहमग्नाः ।
मनसैत्य वधूत्वमभ्यनन्दन्
किमु दोषोऽस्त्यथ रावणानुजायाः ? ॥ ६ ॥

त्वयैव स्रष्टा हि वयं ततोऽस्म-
त्संरक्षणावश्यकता तवैव ।
अस्माभिराराधनमिच्छसि त्वं
यद्येतदुत्कोचतयैव निन्द्यम् ॥ ७ ॥

## अपूर्व सन्देशः

भो भो मानव ! मा नवं भज महादुःखं विवाहात्मकं
प्राक्सौख्यभ्रमदं क्रमेण विषमं नानाविपत्कारणम् ।
गर्भावासजनिक्षुधामयमुखानेकव्यथापीडितः
प्रागेवासि हतः कुतः पुनरसावाध्यात्मतापो नवः ॥ १ ॥

## सूर्योपासनम्

नमस्सूर्याय रवये भानवेऽर्काय भास्वते ।
पूष्णेऽर्यम्णे द्युमणये सवित्रे कर्मसाक्षिणे ॥ १ ॥

जगन्नेत्राय सूर्याय मित्राय हरये नमः ।
नमस्तरणये नित्यं तपनाय विवस्वते ॥ २ ॥

नमस्त्रयीशरीराय वन्ध्यायास्त्वंशुमालिने ।
मार्तण्डायास्तु हंसाय तेजसां निधये नमः ॥ ३ ॥

वितरतु तपनो नस्सर्वदाऽऽरोग्यभाग्यं
दिशतु धनसमृद्धिं पावनः पावको नः ।
प्रदिशतु शितिकण्ठश्शुद्धसुज्ञानवृद्धिं
मुररिपुरथ मोक्षं यच्छतु स्वच्छसौख्यम् ॥ ४ ॥

## भवानी स्तोत्रम्

नीललोहितवर्णोत्थप्रभावस्सुमहान् खलु ।
शुचि चाप्यनुरक्तं च मनो नृणां भवेद्यतः ॥ १ ॥

भावयाम्यम्ब भवतीं भवानीं भाग्यदां भृशम् ।
भर्गोऽप्युग्रतपस्तप्त्वा यदनुग्रहभाग्बभौ ॥ २ ॥

साक्षाद्दाक्षायणी क्षिप्रमतीक्ष्णाक्षिसमीक्षितैः ।
वीक्ष्यास्मानक्षयक्षेमदानदक्षाभिरक्षतु ॥ ३ ॥

अनङ्गद्विषदर्धाङ्गी गंगाधरमनोहरा ।
मङ्गलं तनुतात्सा नः सर्वदा सर्वमङ्गला ॥ ४ ॥

## श्रीगणपतिस्तुतिः

विघ्नराजं जगद्बीजं गजास्यं भुजगस्रजम् ।
वृजिनव्रजहर्तारं भजतां भज तं निजम् ॥ १ ॥

वरदैर्द्विरदास्योऽयं पञ्चभिश्चाञ्चितः करैः ।
चतुर्भ्यः पुरुषार्थेभ्योप्यधिकं दित्सुरस्ति किम् ॥ २ ॥

लसदंकुशपाशपुण्यहस्तं कुसुमालंकृतमात्तपीतवस्त्रम् ।
असुरान्तकमेकदन्तमन्तर्व्यसनघ्नं वरविघ्नराजमीडे ॥ ३ ॥

करुणाकरमम्बिकातनूजं शरणार्थ्याश्रितरक्षणैकदक्षम् ।
चरणाम्बुजसन्नतामरेन्द्रं हरिणाङ्काञ्चितशीर्षसूनुमीडे ॥ ४ ॥

मोदकाङ्कुशपाशपुस्तकहस्तमागलहस्तिनं
वेदशीर्षपरिष्टुताद्भुतवैभवं भवसंभवम् ।
विघ्नराशिमहीध्रभञ्जनवज्रमङ्घ्रिनिषेविणा-
मेकदन्तमनेकदं तमहं महोनिधिमाश्रये ॥ ५ ॥

## श्रीस्कन्दस्तवः

वन्दारुवृन्दमन्दारं स्कन्दं कन्दर्पसुन्दरम् ।
अमन्दानन्ददं वन्दे मन्दस्मितमरिन्दमम् ॥ १ ॥

उमाकुमारं समरेऽमरारिप्रमापणैकप्रवणं प्रवीणम् ।
सुमोपमाञ्चत्सुकुमारकायं नमाम्यहं देववरं कुमारम् ॥ २ ॥

स्कन्दं गुहं नंदनमिन्दुमौलेः
षडाननं क्रौञ्चभिदं कुमारम् ।
शरोद्भवं शक्तिधरं विशाखं
तं तारकारिं भज बर्हिवाहम् ॥ ३ ॥

शरवणसम्भव भवभव करुणार्णवभोस्तवारुणौ चरणौ ।
शरणागतभरणचणौ स्यातां मम मरणेऽपि सदा स्मरणे ॥ ४ ॥

स्थाणुः पिताहो जननीत्वपर्णा
स्वयं विशाखः तदपि त्रयोमी ।

यच्छन्ति कल्पद्रुमवत्प्रकामं
पादाश्रितानां सुफलानि नित्यम् ॥ ५ ॥

## श्रीपुरन्दरदासः

पुरन्दराख्यदासानां सूक्तयो हरिभक्तिदाः ।
कर्णाटभाषाभिज्ञानां केषां वा न मनोहराः ॥१॥

कर्णाटभाषागीतैस्तैः बहुभिर्बहुधा स्तुवन् ।
श्रीकृष्णं स्ववशं नीतो योऽसौ दासः पुरन्दरः ॥ २ ॥

वेदान्ततत्वसाराणि ज्ञानभक्तिप्रदानि च ।
मनश्शान्तिनिदानानि पौरन्दरवचांसि हि ॥ ३ ॥

नास्तिक्याहतकालेऽस्मिन् पुरन्दरसुगीतयः ।
न सन्ति चेत्पशुप्रायाः सीदन्ति स्म वृथा जनाः ॥ ४ ॥

लोकव्यवहृतेः स्फूर्तौ ज्ञानभक्तिप्रचोदने ।
पुरन्दरेण नोक्तानि गानानि न च सन्ति हि ॥ ५ ॥

प्रख्यातपुंसां प्रतिमाः सन्त्यनेकत्र निर्मिताः ।
पूज्यानामीदृशां मूर्तिस्स्थापनीयार्यमन्दिरे ॥ ६ ॥

## ज्ञानसुधाबिन्दुः

चक्षुर्भूषणमीक्षणं मधुरिपोस्तन्नामसङ्कीर्तनं
जिह्वाभूषणमस्य चिन्तनमपि स्वान्तस्य सद्भूषणम् ।
तद्वृत्तश्रवणं सतां श्रवणयोर्भूषा शिरोभूषणं
तत्पादाब्जनमस्क्रिया हरिपदाब्जार्चा करालङ्कृतिः ॥ १ ॥

साफल्यं जन्मनश्चापि सदुदर्कं यदीच्छसि ।
अचञ्चलमना भक्त्या क्षणं वा भज माधवम् ॥ २ ॥

किं कुक्कुटो वपुषि पक्षयुगं न धत्ते
शक्नोति किं गगन उड्डयितुं स पक्षी ।
विद्यामधीत्य विबुधत्वमवाप्य केचित्
संभाषणे सदसि वा कवनेऽप्यशक्ताः ॥ ३ ॥

अशक्यं शक्यं तद्भवति यदि नारायणकृपा
न चेत्तत्कारुण्यं सुलभमपि कार्यं न भवति ।
विनाहो ! तेनाल्पं तृणमपि न किञ्चित् प्रचलति
ध्रुवं तद्वाक्यं भो भजत शरणं शौरिचरणम् ॥ ४ ॥

यस्संसारमहीरुहस्य नियतं बीजं कुठारोप्यहो
यश्शृङ्गाररसार्णवोच्छ्रयविधुः निघ्नेन्द्रियो योगिराट् ।
यश्चाजोऽपि पुनः पुनश्च जनिमान् नानाकृतिर्निर्वपुः
यस्तस्मै पुरुषोत्तमाय हरये भास्वन्महिम्ने नमः ॥ ५ ॥

अतीन्द्रियं त्वामिति चित्रवृत्तं
कथं श्रयेज्ञः कथमर्चयामि ।
प्रेक्षे कथं नाथ कथं स्मरामि
ततोस्म्यकुर्वन् किमपीह तूष्णीम् ॥ ६ ॥

त्वत्सेवासमये त्वचेतन इवास्म्यज्ञोऽहमित्युच्चरन्
संसारे विविधक्रियासु निरतः प्राज्ञोऽस्मि वित्तार्जने ।
इत्थं त्वामपि वञ्चयन्तमलसं सत्कर्मविद्वेषिणं
किं मां पातयसीह वोद्धरसि वा श्रीश ! त्वदङ्घ्र्याश्रयम् ७

अशनवसनादिभ्योदिग्भ्यो दिशः किल पर्यटन्
कृपणमपवित्रं त्वं मत्तं नृपं परिसेवसे।
सकलजगतामीशं श्रीशं विशालकृपाशयं
नतजनहिते नित्यासक्तं कुतो न समर्चसि ॥ ८ ॥

## चरमाभिसन्धिः

कष्टं स्पष्टं जन्मना जन्मिनां यत्
शिष्टानिष्टं विष्टपे तद्धि दृष्टम्।
इष्टं दुष्टस्यात्र श्रमे प्रेम गात्रे
भ्रष्टः श्रेष्ठात् श्रेयसोऽहं प्रणष्टः ॥ १ ॥

गाहं गाहं मोहसिन्धौ हतोऽहं
नत्वा नत्वामस्मरं श्रीश जातु।
दीनाधीनं प्राहुरार्याः किल त्वां
नाथानाथं चञ्चलं मुञ्च मा माम् ॥ २ ॥

नन्दालिन्दे मन्दमन्दं चरन्तं
वन्द्यं मन्दारार्चिताङ्घ्रिं मुकुन्दं।
सान्द्रामिन्द्रोत्सृष्टवृष्टिं वहन्तं
वन्दे बृन्दे गोपिकानां ललन्तम् ॥ ३ ॥

छिन्दन् बन्धं संसृतेर्नन्दसूनो
शुद्धां स्निग्धां बुद्धिमुत्पाद्य तेऽग्रौ।
यच्छन् स्वच्छां त्वत्पदाब्जार्चनेच्छां
भव्यं दिव्यं धाम ते मां नयार्तम् ॥ ४ ॥

धाम्नां धाम्नि व्योम्नि दिव्ये सतीभिः
श्लाघ्ये भोग्ये नागभोगे निषण्णम् ।
स्तुत्यं नित्यैर्भक्तियुक्तैश्च मुक्तैः
श्लक्ष्णं जिष्णुं विष्णुमक्ष्णाहमीक्षे ॥ ५ ॥

हृद्यं वेद्यं वेदवेदान्तसारैः
पारावारं भूरिकारुण्यवाराम् ।
भक्त्याऽसक्त्या नित्यमर्चन् प्रकृत्या
त्यक्त्वाऽनित्यं कृत्यमन्यत् सुखी स्याम् ॥ ६ ॥

## मानवमानः

अपूर्वां प्रपद्योच्चविज्ञानशक्तिं
वशीकृत्य पञ्चापि भूतानि तानि ।
विचित्राणि यन्त्राणि निर्माय माया-
भ्रमाधायि कर्माणि कुर्मः प्रयत्नैः ॥ १ ॥

विशामोऽब्धिमूलं भ्रमामो ग्रहाणां
उपर्यन्तरिक्षे भुवोऽन्तश्चरामः ।
असाध्यं नराणां न चाप्यस्ति किञ्चित्
वयं दैवशक्तिर्वृथेत्येव विद्मः ॥ ॥ २ ॥

इति स्वाभिमानोदितां वाचमेवं
ब्रुवाणान् विलोक्यास्मि खिन्नान्तरङ्गः ।
महावृष्टिपीडां महीकम्पभीतिं
प्रवातापदं ते विनिघ्नन्ति किन्तु ॥ ३ ॥

महावृष्टिभीतिः क्वचिन्नैव वृष्टिः
क्वचिद्व्याधिबाधा क्वचित् क्षामशङ्का ।
किमेतानि कष्टान्यपोह्याशु लोके
सुभिक्षं च सौख्यं च ते कल्पयंति ॥ ४ ॥

अहो ! पञ्चभूतेषु चैकैकमात्म-
प्रकोपप्रकाशाय चेदुद्यतं स्यात् ।
नरः किन्तु सोढुं समर्थः किमर्थं
वृथा स्वप्रथां वक्त्वयशक्तोप्युदात्ताम् ॥ ५ ॥

जरामृत्युभीतिः स्थिराद्यापि लोके
निराकर्तुमेनां नरा नैव शक्ताः ।
पराशक्तिरेका हरेरस्ति तस्मात्
स्मरामोऽविरामं चिरं सर्वशक्तम् ॥ ६ ॥

## नरस्स्वतंत्रस्स्वतएवनिर्घृणः

दन्तिनं हन्ति दन्तार्थं कौशेयार्थं कृमीनपि ।
पशून् मांसाय कस्तूर्यै तन्मृगान् राक्षसो नरः ॥ १ ॥

सिंहान् व्याघ्रान् गजानुष्ट्रान्
क्रोडान् छागान् कपीन् हयान् ।
कृत्वाऽऽधीनान् सनिर्बन्धं
नर्तयत्यदयो नरः ॥ २ ॥

न तदस्ति हि यद्वस्तु नृणां भुव्यप्रयोजकम् ।
नरास्तावत्समस्तानां प्राणिनां निष्प्रयोजकाः ॥ ३ ॥

नृशंसनं प्राणिगणेन यत्कृतं नरो नृशंसश्चतुरोऽन्यपीडने।
इतीह तत्सार्थयितुं स्वकं यशः नरोऽन्यजन्तून् परिपीडयत्यहो ॥ ४ ॥

यथा स्वस्य तथान्यस्याप्यनिष्टा दुःखदा विपत्।
इति मत्वाऽप्यन्यपीडां दुःखदां कुरुते नरः ॥ ५ ॥

दयालवस्ते धन्या हि परदुःखासहिष्णवः।
स्वक्लेशान् ये त्वनालोच्य त्रायन्ते दुःखिनः क्षतात् ॥ ६ ॥

## कलिकालकालः

असतामसितां शक्तिं ददते दद्यते तमः।
हरते हरतेजोऽपि कलये कलये नमः ॥ १ ॥

छिनत्ति धर्मं हरति प्रशान्तिं
सत्यं भिनत्त्यास्तिकतां निहन्ति।
क्षमां ग्रसत्येव दयां धुनोति
कालः कलिः क्रूरतरक्रियोऽयम् ॥ २ ॥

पुष्णाति शाठ्यं जनयत्यविद्यां
क्रौर्यं दुराशामपि सञ्चिनोति।
असत्प्रवृत्तिं परिरक्षतीति
क्रूरः कलिः क्रीडति कुत्सितोऽसौ ॥ ३ ॥

भक्तिर्न देवेषु भयं न पापात्
पराङ्गनासङ्गरुचौ न लज्जा।
दौष्ट्ये प्रवृत्तिस्सुजनेष्वसूया
कलेर्हि कालस्य कटुक्रियेयम् ॥ ४ ॥

सर्वान्यभाषोपचयोपकर्त्री
या रम्यभावार्थरसाढ्यशब्दा
तां घ्नन्ति गीर्वाणगिरं वराकाः
कलेः किलेयं कुटिलप्रवृत्तिः ॥ ५ ॥

राज्ये व्याज्यनिदानमन्त्रिनिवहैः स्वातन्त्र्यतन्त्रोदित-
क्रान्त्या शान्तिहरैर्जनैश्च निखिला क्लिश्यन्ति नश्यन्ति च ।
अन्याय्येन निजाधिकारचपलाः स्वार्थैकनिष्ठा जनाः
दुष्टाचारपराः कुतस्सुगुणिनां शान्तिस्सुखं विष्टपे ॥ ६ ॥

भीतिर्योषापहारात् ज्वलदनलकृतास्वादसर्वस्वभीतिः
चोराक्रान्तप्रमुष्टाखिलधनविपदुद्विग्नलोकस्य भीतिः ।
अन्योन्याघट्टिता नश्शतहतजवता बन्धुवर्गस्य भीतिः
जातिद्वेषोत्थभीतिस्त्विति भयविवशाः नः प्रजाश्चाद्य राज्ये ॥७॥

रुजा भीतिः क्षुधाभीतिः जीविकालाभभीरिति ।
नानाभीतिभिराक्रान्ताः रामराज्येऽत्र नः प्रजाः ॥ ८ ॥

## दारिद्र्यमहिमा

दारिद्र्यस्य महत्वमुत्तमरसालङ्कारभावादिभिः
कृत्वा श्लोकचतुष्टयेन कथितं प्राज्ञाय राज्ञे मया ।
दत्तं तेन धनं पुनर्निजपुरं गच्छन् वने भीकरैः
चोरैस्तच्च हृतं प्रिये गृहमगां तैस्ताडितोऽहं व्रणी ॥ १ ॥

क्लीबति बधिरति मूकत्यन्धत्यज्ञति नरं समर्थमपि ।
चोरति नीचति शठति प्रबलतरं हन्त ! दारिद्र्यम् ॥ २ ॥

दारिद्र्यध्वस्तधृतिर्निजं तेजो बलं च विस्मरति ।
मन्दाक्षान्मन्दाक्षो निन्दति जन्मात्मनो वन्ध्यम् ॥ ३ ॥

एतद्गेहमहानसस्य पुरतो वातायनस्यान्तिके
बालैस्साकमिहोपविश्य कुरुते किं विप्र नित्यं भवान् ।
निस्स्वोऽहं धनिनोऽस्य सूदरचितैर्भक्ष्यादिभिर्जायते
यो गन्धो रुचिरश्च तेन पृथुकान् सन्तोषयाम्यन्वहम् ॥ ४ ॥

नग्नामष्टशरद्वयः परिमितां लज्जान्वितां मत्सुतां
वीक्ष्यादात्कृपयैव काचिदबला हेमन्तकालेऽम्बरम् ।
दैवं हि प्रबलं विशोध्य सलिले तच्छोषयाम्यातपे
यावत्तावदुपेत्य हन्त कपयस्तत्खण्डशोऽखण्डयन् ॥ ५ ॥

मत्पाणिग्रहणेन किं तव सुखं दारिद्र्यदग्धाशयम्
त्यक्त्वा मां दयिते ! रमस्व धनिना केनापि यूना समम् ।
पत्युर्वाचमिमां सती श्रुतवती सौशील्यनाशात्मिकां
शान्तं पापमिति ह्रिया प्ररुदती सद्योऽभवन्मूर्च्छिता ॥ ६ ॥

## दारिद्र्यवर्णनम्

दारिद्र्याद्बुद्धिचातुर्यं धैर्यं दैहिकपाटवम् ।
मितव्ययमतिः नृणां जायन्ते शान्तिरात्मनि ॥ १ ॥

दारिद्र्यस्य प्रभावेन विचित्रतरचेष्टिताः ।
श्लाघार्हाः दूषणार्हाश्च जायन्ते भुवि मानवाः ॥ २ ॥

दारिद्य किं तव फलं मम पीडनेन
याञ्चात्मजां यदसि दित्सदहो बलान्मे ।
मत्पाणिपीडनवती प्रथमं हि लज्जा
ते कन्यकां कथय सा सहते कथं वा ॥ ३ ॥

[लज्जा—याञ्चार्थं पाणिं प्रसारयितुं पीडयति यतः मया प्रथमं विवाहिता च]

मनस्थैर्ये तादृक् क्षितिभृदपि यः स्यात् विनमितः
त्वया पीतो यस्मात् गुणजलनिधिश्चापि विपुलः ।
कृता लोपामुद्रा यदविरहिता भूतिषु सुखे-
ष्वतो दारिद्यार्थं त्वमपि समभूः कुम्भजमुनिः ॥ ४ ॥

[अगस्त्यपक्षे लोपामुद्रा पत्नीभूतिषु अविरहिता कृता। दारिद्र्यपक्षे भूतिषु लोपाः मुद्राः कृताः]

अनवाप्तकालजग्धेर्मम भारतरोचितात्मवृत्तेश्च ।
आकिञ्चन्य बत त्वं व्यासमुनित्वं ददासि बहुमान्यम् ॥ ५ ॥

[व्यासपक्षे अनवाप्तकालजग्धिः यमस्याहारता व्यासेन नासादिता भारते रोचिता आत्मवत्तिः येन सः । दारिद्र्यपक्षे-कालकाले अनवाप्तभोजनः भारतर उचितात्मजीवनश्च ।]

## सदसज्जनस्वभावः

सतां प्रवृत्तिर्ह्यसतां प्रवृत्तिः
विपर्ययं नैति कदापि किञ्चित् ।
सन्तो न मुञ्चन्ति च सद्गुणान् स्वान्
विपत्स्वपि स्वां शठतां न दुष्टाः ॥ १ ॥

कठिनतरं किल हृदयं
  सतां तथा सतां च सदृशगुणम् ।
स्वापदि कठिनं हि सतां
  हृदयं हि परापदि त्वसताम् ॥ २ ॥

असतां च सतां चित्तं बहुभिन्नगुणं स्वतः ।
प्रागन्यदुःखदं क्रूरं मृद्वन्यहितदं परम् ॥ ३ ॥

अहं तावद्दुष्टान् प्रथममभिनन्द्य स्तुतिशतैः
  स्तुवन् पश्चात् साधून् परिचरितुमीहे मुहुरिह ।
न चेदेवं कुर्यां सुजनपरिपीडासु निरताः
  महान्तं विघ्नन्ते विदधति हि सत्कार्यकरणे ॥ ४ ॥

## सत्पुरुषक्रोधः

क्रोधं नैव समेति निष्ठुरवचः श्रुत्वापि शांत्यात्मनः
  बाधां वा सहते कृतां हि सुजनस्त्वेवं यदि क्रूरधीः ।
साधून् हिंसति नश्यति स्वयमयं तत्क्षान्तिभूवह्निना
  किं नोदेत्यशनिस्सुशीतलघनादप्यग्निसुग्भीकरः ॥ १ ॥

## गीताजयन्ती

गीता माता पार्थसूतस्य जाता
  ख्याता पूता पातु नः प्रीतचित्ता ।
यातायातैस्संसृतेर्भीतिभीता
  नेतां प्रातर्ध्यायतस्त्रायतेऽस्मान् ॥ १ ॥

अच्युतवदनाच्युतममुमच्युतमुच्चैश्चिरं समुच्चरत ।
कृच्छ्राण्युच्छिद्य परं यच्छति फलमिच्छितं च मन्त्रोऽयम् ॥ २ ॥

गीतोपनिषत्सु हरिं प्रत्यक्षं शक्यते द्रष्टुम्।
बहुविधशास्त्राभ्यसनादाविलमनसो विचिन्वतस्तत्वम् ॥ ३ ॥

अस्थिरवपुषः पुष्टिं माता पृथुकस्य सदा कुरुते।
गीतामाता नितरां चेतनसमुद्भूतैर्मुहुर्यतते ॥ ४ ॥

चिद्दृष्टं वा तदचिद्दृष्टं चिदचिद्दृष्टं परमवरिष्ठम्।
स्पष्टमनष्टं चेष्टतमं मे तिष्ठतु हृदये किमपि महस्तत् ॥ ५ ॥

उपनिषदर्थविरुद्धैरशास्त्रैर्ग्रसितानियं समुद्धरति।
गीतायां परतत्वं प्रत्यक्षं शक्यते द्रष्टुम् ॥ ६ ॥

श्रीकृष्णवक्त्राम्बुरुहात्प्रवृत्तां
गीतासुधानिर्झरिणीं पिबन्तः।
शरीरिणो जन्म पुनर्नयान्ति
श्रीशं सदा चार्चति दिव्यधाम्नि ॥ ७ ॥

## सुभाषितबिन्दवः

सुखदुःखामयत्रासक्षुन्निद्रादिषु देहिनाम्।
समतास्ति च तत् ज्ञात्वा सर्वेषां हितमाचरेत् ॥ १ ॥

केचिन्नाटकनृत्यचित्ररचनाचातुर्यसम्मानिताः
केचित्साहसकर्मतोषितजनाः केचित्सुशिल्पक्रियाः।
केचिल्लोकहितैककार्यनिरतास्स्वार्थैकनिष्ठाः परे
ह्येवं स्त्रीपुरुषेषु भिन्नचरितं लोकेऽत्र संदृश्यते ॥ २ ॥

भवाभिधाब्धेर्भो भीरो किं बिभेति भवान् भृशम्।
भगवान्भार्गवीभर्ता भीतिभिद्भाति तं भज ॥ ३ ॥

# सर्वस्सर्वं नैव शक्नोति कर्तुम्

सङ्गीतज्ञः किं सुपाकक्रियावित्
वेदाध्यायी किं सुकाव्यं करोति ।
वैद्यश्रेष्ठः किं प्रवीणस्सुशिल्पे
सर्वस्सर्वं नैव शक्नोति कर्तुम् ॥ १ ॥

यन्त्रोद्योगं किं वणिग्वेत्ति किं वा
शक्तो वीणावादने स्वर्णकारः ।
धन्वी किं वा जायते तन्तुवायः
सर्वस्सर्वं नैव शक्नोति कर्तुम् ॥ २ ॥

शक्तो विद्याबोधने धीवरः किं
शास्त्राभ्यासं मन्दधीः किं करोति ।
सेवाजीवी किं नु विज्ञानदक्षः
सर्वस्सर्वं नैव शक्नोति कर्तुम् ॥ ३ ॥

# महाकविः

न ददाति धनं न वस्त्रमन्नं न च नो रत्नचयं महाकविर्नः ।
अमृतस्रवणैर्मनोज्ञकाव्यैः रसिकानाममितां मुदं विधत्ते ॥ १ ॥

# भवभूतिः

पदे वा वाक्ये वा मृदुवचसि वा भावघटने
रसानां सृष्टौ वा ध्वनियुतकृतौ वाप्यर्थकथने ।
तथालङ्काराणां प्रसरणविधौ वा निपुणधीः
भवो वा भूतिर्वा भवति भवभूतिर्भुवि सताम् ॥ १ ॥

रामस्योत्तरचरिते शोकरसस्तु प्रधान एवमपि ।
नवरसभरितं तदिदं भवभूतिः किल विशिष्यते तस्मात् ॥ २ ॥

भवभूतिवरश्लोककथनाद्याति शं नरः ।
भवभूतिवरश्लोककथनाद्याति शं नरः ॥ ३ ॥

## दर्पणदशकम्

संसारिणां समुपयुक्तपदार्थवृन्दे-
ष्वेकं त्वमप्यसि हि भो मुकुरातिमुख्यः ।
त्वत्सन्निधानमभितस्समवाप्य सम्यग्-
गेहेषु भाति रुचिरा ननु कान्तिलक्ष्मीः ॥ १ ॥

न केवलं मन्दिररञ्जनं त्वं करोषि भो दर्पण नित्यमेव ।
यथा हि पुष्पाक्षतचन्दनानि माङ्गल्यवस्तूनि तथैव च त्वम् ॥ २ ॥

त्वत्सन्निधिं प्राप्य जनास्समस्ताः सुरूपिणो वाऽथ कुरूपिणो वा ।
मुहुर्मुहुश्चोत्सुकिनः स्वरूपं पश्यन्ति हृष्यन्ति च निर्विशेषम् ॥ ३ ॥

त्वयि स्ववक्त्रं त्ववलोकमाना नरा हि नानाविधभङ्गियुक्तम्
मुखं च नेत्रं च परामृशन्तस्स्वदन्तपंक्तिं तव दर्शयन्ति ॥ ४ ॥

पुरुषेभ्योऽप्यधिकतरं मुकुर त्वं प्रियतमोऽसि वनितानाम् ।
यस्मात् त्वत्पुरतोऽमूः विलासविकसितमुखाम्बुजा भान्ति ॥ ५ ॥

पुरुषो वा वनिता वा तव तु धुरि तथा च यद्यदाचरति ।
तत्प्रतिबिम्बेनैतत्सर्वं च त्वयि तथैव कारयसि ॥ ६ ॥

देवालयेषूषसि सुप्रभातं देवोत्तमानां स्तुतिभिर्निवेद्य ।
तेषां शुभं यं किल दर्शयन्ति त्वां त्वं च तं हन्त बिभर्षि चान्तः ।। ७ ।।

भो दर्पण त्वमतिदर्पभरं बिभर्षि कन्दर्पसुन्दरजनांश्च कुरूपिणश्च ।
सन्दर्शयामि हि यथावदितीह वेत्सि सर्वास्तु दर्शयसि तद्विपरीतवृत्त्या ।।

कठिनस्पर्शोऽपि भवान्मुकुर न सहतेऽपघातलेशमपि ।
क्वचिदपि विघटितश्चेत् त्रुटितस्त्वं पतसि हि तदैव ।। ९ ।।

निर्मलतरवपुषस्ते मालिन्यं किमपि किञ्चिदपि ।
भवति यदि त्वं मुकुर प्रतिहतशक्तिर्न लोकनार्होऽसि ।। १० ।।

गुणदोषौ सकलेष्वपि वस्तुषु नियतं ननु स्त इति ।
गदितुं दर्पणदशकं रचितं हि मयाल्पमतिनैवम् ।।

## संमार्जनीस्तुतिः

संमार्जनि ! त्वां भुवनोपकर्त्रीमनादरात् केऽप्यवधीरयन्तु ।
गृहाङ्गणे धूलिकणावृते त्वां सम्भावयन्त्येव जनास्त एव ।। १ ।।

प्राप्ते प्रभातावसरे शयानाः स्त्रियस्समुत्थाय तदैव गेहे ।
त्यक्त्वाऽन्यकार्यम् प्रथमं भवत्यास्साह्यात् गृहान्तः परिशोधयन्ति ।। २ ।।

राज्ञां गृहे देवगृहे च गोष्ठे महानसे पर्णगृहे मठे वा ।
नृणां निवासार्हसमस्तदेशे व्याप्तिस्तवास्ते त्वमतोऽसि पूज्या ।। ३ ।।

अशुद्धदेशस्स तु शुद्धदेशोऽस्त्यसाविति त्वं सहजं प्रभेदम् ।
अपास्य सर्वत्र समानरीत्या बहिःस्थलं देवगृहानुपास्से ।। ४ ।।

वनान्तभूम्यामपि पर्वताग्रे पवित्रदेशे जननं भवत्याः ।
तस्माज्जनस्त्वां गृहशुद्धकार्ये सदोपयुंक्ते हि निसर्गपूताम् ॥ ५ ॥

उपनयनविवाहाद्युत्सवानां प्रसंगे
सदसि जनगणानामागमे च प्रसक्ते ।
प्रथममपि भवत्यां तत् स्थले संचरन्त्यां
भवति हि परिशुद्धा गेहभूमिर्जनार्हा ॥ ६ ॥

बाल्ये शिशूनां यदि दृष्टिदोषस्स्याद्वा तदानीं तव देहकाण्डे ।
किंचित् गृहीत्वाऽग्निशिखाप्रदीप्तं नीराजयन्त्याशु च दोषशान्त्यै ॥ ७ ॥

भूतादिदुष्टग्रहपीडितानां नृणां विपन्मोचनकर्मसक्ते ।
व्यर्थप्रयोगे सति मान्त्रिकेऽपि त्वां वीक्ष्य भीताः किल यान्ति भूताः ॥

त्वां सूतिकागेहसमीपदेशे दूतीमिवाचारविदो निवेश्य ।
अर्चन्ति धूपश्शिशुरक्षणार्थम् तव प्रभावस्सुमहान् चकास्ति ॥ ९ ॥

नैसर्गिकं ते सुदृढैकमत्यं स्वजातिसंश्लेषपराऽसि तस्मात् ।
तं सद्गुणं बोधयितुं पदार्थानेकीकरोष्याशु भुवि प्रकीर्णान् ॥ १० ॥

शैत्याधिक्यादार्द्रकाष्ठोपयोगात् जातंवह्नेर्मान्द्यमुत्सारयन्त्यः ।
त्वामेवाग्नौ ज्वालयन्त्योऽतिशीघ्रं पाकोद्योगं पूरयन्त्येव नार्यः ॥ ११ ॥

धान्यानां परिमार्जनप्रकरणे संमार्जनि ! त्वां जनाः,
कृत्वाधोमुखनम्रशीर्षशिखरा भांडेऽग्निदग्धे मुहुः
संचार्यातिसुतापतप्ततनुमप्युच्चैः परिभ्रामय-
न्त्येवं लोकहिताय ताम्यसि सदा नोपेक्षणार्हास्ततः ॥ १२ ॥

दीपप्रज्वलनाय किंच तिलकं वक्त्रे निवेष्टुं तथा,
कर्तुं भोजनपत्रसीवनमथो दन्तस्य निर्घर्षणम्।
कर्तुं भेषजलेपनं रचयितुं संमार्जनि प्रायशः
त्वद्गात्रावयवः प्रयोजनकरः लोकस्य नानाविधैः ॥ १३ ॥

क्षेत्रे गृहे धान्यकणान् प्रकीर्णानास्वादनेच्छारहितैव तावत्।
राशीकरोष्याशु गुणान् तवैतान् श्लाघ्यान् सदैवानुसरन्तु लोकाः ॥१४॥

गृहे रुषान्धैर्गृहिभिः प्रसक्ते भयंकरे दुष्कलहेऽनिवार्ये।
तदा त्वयाताड्य परस्परं ते स्वकोपशान्तिं क्रमशो लभन्ते ॥ १५ ॥

अनेकपादप्रकरावृतापि गृहस्य कोणे क्वचिदेव लीना।
अन्यैर्गृहीता च करेण भूम्यां संचारितैवाटसिबालिकेव ॥ १६ ॥

नान्ने तवेच्छा न च वाससीच्छा शय्यासु नेच्छा न च भूषणेच्छा।
परं त्ववश्यं बत वाञ्छसि त्वं निरन्तरं तत्कटिसूत्रमेकम् ॥ १७ ॥

सुसूक्ष्मपादाग्रशिलीमुखांस्त्वं नृणां पटान्तर्ननु सम्प्रयुज्य।
तान् बाधमाना निजकोपवेगमेवं जनानां प्रकटीकरोषि ॥ १८ ॥

शूर्पः पतिस्तेऽतिपतिव्रताऽसि संमार्जनि त्वं भुवि संचरन्ती।
संपादितं सर्वमपि प्रियाय प्रयच्छसि स्वार्थमपास्य हन्त ॥ १९ ॥

लोकोपयोगतनुयष्टिरसि स्वतस्त्वं सर्वेषु गेहनिवहेष्वनिवार्यवासा।
एवं स्थितेऽपि सुलभक्रयमात्रलभ्या संमार्जनि ! प्रथितकीर्तिमती विभासि ॥

बहुविधलोकोपकृतिं कृत्वाप्येवं न तेऽवलेपोऽस्ति।
किमपि त्वं प्रतिफलमपि नेच्छसि किमिदं तवाद्भुतं चरितम् ॥ २१ ॥

वनान्तभूम्यामपि पर्वताग्रे पवित्रदेशे जननं भवत्याः ।
तस्माज्जनस्त्वां गृहशुद्धकार्ये सदोपयुंक्ते हि निसर्गपूताम् ॥ ५ ॥

उपनयनविवाहाद्युत्सवानां प्रसंगे
सदसि जनगणानामागमे च प्रसक्ते ।
प्रथममपि भवत्यां तत् स्थले संचरन्त्यां
भवति हि परिशुद्धा गेहभूमिर्जनार्हा ॥ ६ ॥

बाल्ये शिशूनां यदि दृष्टिदोषस्स्याद्वा तदानीं तव देहकाण्डे ।
किंचित् गृहीत्वाऽग्निशिखाप्रदीप्तं नीराजयन्त्याशु च दोषशान्त्यै ॥ ७ ॥

भूतादिदुष्टग्रहपीडितानां नृणां विपन्मोचनकर्मसक्ते ।
व्यर्थप्रयोगे सति मान्त्रिकेऽपि त्वां वीक्ष्य भीताः किल यान्ति भूताः ॥

त्वां सूतिकागेहसमीपदेशे दूतीमिवाचारविदो निवेश्य ।
अर्चन्ति धूपैश्शिशुरक्षणार्थम् तव प्रभावस्सुमहान् चकास्ति ॥ ९ ॥

नैसर्गिकं ते सुदृढैकमत्यं स्वजातिसंश्लेषपराऽसि तस्मात् ।
तं सद्गुणं बोधयितुं पदार्थानेकीकरोष्याशु भुवि प्रकीर्णान् ॥ १० ॥

शैत्याधिक्यादार्द्रकाष्ठोपयोगात् जातंवह्नेर्मान्द्यमुत्सारयन्त्यः ।
त्वामेवाग्नौ ज्वालयन्त्योऽतिशीघ्रं पाकोद्योगं पूरयन्त्येव नार्यः ॥ ११ ॥

धान्यानां परिमार्जनप्रकरणे संमार्जनि ! त्वां जनाः,
कृत्वाधोमुखनम्रशीर्षशिखरा भांडेऽग्निदग्धे मुहुः
संचार्यातिसुतापतप्ततनुमप्युच्चैः परिभ्रामय-
न्त्येवं लोकहिताय ताम्यसि सदा नोपेक्षणार्हास्ततः ॥ १२ ॥

दीपप्रज्वलनाय किंच तिलकं वक्त्रे निवेष्टुं तथा,
कर्तुं भोजनपत्रसीवनमथो दन्तस्य निर्घर्षणम् ।
कर्तुं भेषजलेपनं रचयितुं संमार्जनि प्रायशः
त्वद्गात्रावयवः प्रयोजनकरः लोकस्य नानाविधैः ॥ १३ ॥

क्षेत्रे गृहे धान्यकणान् प्रकीर्णानास्वादनेच्छारहितैव तावत् ।
राशीकरोष्याशु गुणान् तवैतान् श्लाघ्यान् सदैवानुसरन्तु लोकाः ॥१४॥

गृहे रुषान्धैर्गृहिभिः प्रसक्ते भयंकरे दुष्कलहेऽनिवार्ये ।
तदा त्वयाताड्य परस्परं ते स्वकोपशान्तिं क्रमशो लभन्ते ॥ १५ ॥

अनेकपादप्रकरावृतापि गृहस्य कोणे क्वचिदेव लीना ।
अन्यैर्गृहीता च करेण भूम्यां संचारितैवाटसिबालिकेव ॥ १६ ॥

नान्ने तवेच्छा न च वाससीच्छा शय्यासु नेच्छा न च भूषणेच्छा ।
परं त्ववश्यं बत वाञ्छसि त्वं निरन्तरं तत्कटिसूत्रमेकम् ॥ १७ ॥

सुसूक्ष्मपादाग्रशिलीमुखांस्त्वं नृणां पटान्तर्ननु सम्प्रयुज्य ।
तान् बाधमाना निजकोपवेगमेवं जनानां प्रकटीकरोषि ॥ १८ ॥

शूर्पः पतिस्तेऽतिपतिव्रताऽसि संमार्जनि त्वं भुवि संचरन्ती ।
संपादितं सर्वमपि प्रियाय प्रयच्छसि स्वार्थमपास्य हन्त ॥ १९ ॥

लोकोपयोगतनुयष्टिरसि स्वतस्त्वं सर्वेषु गेहनिवहेष्वनिवार्यवासा ।
एवं स्थितेऽपि सुलभक्रयमात्रलभ्या संमार्जनि ! प्रथितकीर्तिमती विभासि ॥

बहुविधलोकोपकृतिं कृत्वाप्येवं न तेऽवलेपोऽस्ति ।
किमपि त्वं प्रतिफलमपि नेच्छसि किमिदं तवाद्भुतं चरितम् ॥ २१ ॥

रीढाऽतिरूढा भुवि ते कुतो वा
गूढान् गुणौघान् तव न स्मरन्ति ।
लीढाऽसि दोषाल्पबलेन नापि
बाढं हि मूढास्त्वयि साभ्यसूयाः ॥ २२ ॥

उपकारपरम्परां विधात्र्यास्तव सिद्धं बहुमानमेतदेव ।
तव दर्शनमप्यमङ्गलं खल्विति लोके विबुधाश्च मन्वते यत् ॥ २३ ॥

मुंच मुंच हृदि संचितां चिरात् गर्हिताऽस्मि सकलैरिति व्यथाम् ।
शोधिनि ! प्रकृतिसिद्धमेव तत् साधुगर्हणमिदं न नूतनम् ॥ २४ ॥

प्रयोजनाधिक्यमहत्वयुक्तेऽप्यवश्यकत्वेऽपि पदार्थसंघे ।
सौलभ्यदोषेण न मान्यताऽस्ति संमार्जनि ! त्वं भवसीदृशी हि ॥ २५ ॥

सम्मार्जन्यास्सद्गुणान् श्लाघनीयान्
अभ्यस्यन्तु स्वार्थनिष्ठा मनुष्याः ।
अन्तर्यामीचित्यचित्यप्यजस्रं
यः सदृश्रीशः साधुतां नश्चिनोतु ॥ २६ ॥

श्री श्रीनिवाससदने सघने सदाहं ।
संमार्जनी यदि भवामि तदास्मि धन्यः ॥ २७ ॥

येषां वा सदनेषु नास्ति सुचिरादेकापि संमार्जनी
तेऽमी नैव पठन्तु मन्दमतयः रम्यामिमां तत्स्तुतिम् ।
येत्वन्ये स्वगृहेषु सत्कृतमहासंमार्जनीसम्पदः
ते सर्वे सुहृदः पठन्तु रसिकाः स्तुत्यामिमां नित्यशः ॥ २८ ॥

# चटककुटीरम्

मम सदनमिदं चिरेण रम्यं चटककुटीरमिति प्रसिद्धमासीत् ।
मम करतलमेत्य तण्डुलादीन् भयरहिताश्चटकाः स्म भक्षयन्ति ॥१॥

मम कौतुकभंजनाय तेषां चटकानामपि मारणाय कश्चित् ।
समुपेत्य पदे पदे बिडालश्चटकान् हन्ति रहो निगूढदेहः ॥ २ ॥

चटकक्रीडनैः पूर्वम् यत्कौतुककरं बभौ ।
तन्मेऽद्य निष्प्रभं पक्षिविलासात् रहितं गृहम् ॥ ३ ॥

अपसर चटक ! सुदूरं शयनगृहे मे सुरक्षितं नीडम् ।
कर्तुं यतसे तेऽरिः हर्तुम् त्वामोतुरीक्षते समयम् ॥ ४ ॥

# दीपावलीमहोत्सवः

दीपावलीसंभ्रमजृम्भमाणा पापावलीं नः परिहृत्य नित्यम् ।
तापापहर्त्री मनसश्शुभानां सोपानरूपास्तु महोच्छ्र्याय ॥ १ ॥

दीपावलीनामकवासरेऽस्मिन् दीपावली सर्वगृहेषु दीप्ता ।
चक्षुर्मनः कर्षणमातनोति विशेषतो बालकहर्षदात्री ॥ २ ॥

नरकासुरमोक्षसूचकेऽस्मिन् दिवसे ह्युत्सव एष भारतेऽत्र ।
हरिभक्तिमचंचलां वितन्वन् सततं मंगलमातनोतु नृणाम् ॥ ३ ॥

# निद्रास्तु भद्राय नः

निद्रा नाम नरस्य भूरिसुखदा निद्रा जनैकप्रिया
निद्रा देहपरिश्रमं हरति सा निद्राऽखिलैरीप्सिता ।
निद्रा स्वप्नजगद्भवैश्च विभवैरानन्दयत्याश्रितान्
निद्रा निर्जरदुर्लभा भगवती निद्राऽविहीनः सुखी ॥ १ ॥

निद्रांगनेयं चतुरा प्रगल्भा नेत्रांचलस्याऽपि न दृश्यतेऽक्ष्णोः ।
रुग्णांश्च वृद्धांश्च जहाति दूरे बालांश्च यूनोऽप्यनुरज्यते द्राक् ॥२॥

नराणां केवलं निद्रा भूयसी प्रेयसी न हि ।
जीवातुस्सर्वजन्तूनां जागर्ति जगतीतले ॥ ३ ॥

## वित्तवृत्तम्

लोके बलं धनबलं न बलं तदन्यत् यस्य प्रभावभवदुर्भरदर्पदृप्ताः ।
कुर्वन्ति साधुजनबाधकमेव कर्म विन्दन्ति वित्तमखिलेप्सित सिद्धिदक्षम् ॥

न धर्मनिष्ठा न च पापभीतिः नास्त्येव लज्जा करुणा तु नैव ।
नैवापवादाद्भयमर्थलोभात् कर्माद्यनिन्द्यं रचयन्ति केचित् ॥ २ ॥

कांचने कांचनाश्चर्यकरां शक्तिं विलोकये ।
यदापदां पदमपि जनैर्यत्नैरपेक्ष्यते ॥ ३ ॥

## वसन्तर्तुवर्णनम्

ऋतूनां राजाऽसौ किसलयसुमालंकृततनौ
युवत्यां भास्वत्यां सुभगवनदेव्यां प्रणयवान् ।
वसन्तस्सन्तोषात्परिणयविधौ कोकिलगला-
द्गलद्वाद्योद्घोषं शुभकरमितः कारयति हि ॥ १ ॥

चिन्तयन्ति यं वसन्तमन्तरेव कामुकाः
यान्ति कान्तया समं तु यत्र कोकिलाः मुदम् ।
वृन्तपंक्तिमेत्य पुष्पसन्ततिर्यदाऽस्ति तत्
सन्तनोतु सन्ततं वसन्तवैभवं विभुः ॥ २ ॥

कान्तिमन्ति भान्तिभान्त्यनन्तवर्त्मनि स्फुटं
वान्ति शान्तिदास्सदा समीरणाः नभोन्तरे ।
हन्ति हन्त पान्थमाशु मन्मथो यदा च तत्
सन्तनोतु सन्ततं वसन्तवैभवं विभुः ॥ ३ ॥

## नवसंवत्सरः

श्रीमान् पैंगलवत्सरो नरपतिः कालाख्यदेशे स्वकं
विन्यस्यन् पदमद्य राज्यभरणे लब्ध्वाऽधिकारश्रियं ।
लोकेऽस्मिन् जनतासु पक्षवदसौ संवत्सरोऽप्युच्चकैः
सर्वेषां सुखसंपदं वितरतु श्रीनाथदिव्याज्ञया ॥ १ ॥

भो पैंगलाब्द ! तव मानवकालमाने
षष्ट्युत्तरत्रिशतसंमितवासरेषु ।
सर्वाधिकारकरणप्रभुताऽस्ति तस्मात्
लोकस्य सौख्यकरणैर्भव लब्धकीर्तिः ॥ २ ॥

## द्विजमहिमा

वृथैव निन्दन्ति हि केचिदज्ञाः
शुचीन् द्विजान् सर्वजनादरार्हान् ।
द्विजैर्विनाखण्डितकर्कशत्वैः
श्रीपुंमुखानामपि नैव शोभा ॥ १ ॥

द्विजवर्गैः क्रियमाणां जानन्त्युपकृतिममितां तु रसज्ञाः ।
अत एव हि द्विजानां सान्निध्यं न त्यजन्ति च रसज्ञाः ॥ २ ॥

भोजनसमयेऽपि च तद्विजसंसर्गो भवेन्न चेदथवा ।
खाद्येष्वाहारेष्वपि भवति न च रुचिर्बुभुक्षूणाम्* ॥ ३ ॥

## कविताहृदयम्

कदापि कविता कवेः सघृतभोजनं देहि भो
नृपेतिवदिहास्तु मा क्वचिदपि स्वयं नीरसा ।
शरद्धवलचन्द्रिकासमदधीति या व्याहृता
तथास्तु मधुराधुनातनमहाकवीनामपि ॥ १ ॥

शास्त्रेषु पक्वसुधियोपि बुधास्तु केचित्
क्लिश्यन्ति पद्यकलने कृतभूरियत्नाः ।
सामान्यतो विदितसंस्कृतवाग्विलासाः
श्लोकान् विना श्रममहो रचयन्ति केचित् ॥ २ ॥

अर्थस्फूर्तिः भावबोधोऽपि नैव
क्लिष्टैर्वाक्यैः श्लोकपूर्तेः प्रयत्नः ।
एवंभूतैः काव्यवृन्दैः फलं किं
निष्प्रज्ञानां मौनमेवात्र युक्तम् ॥ ३ ॥

स्वकवित्वप्रकटने कुकविर्यतते यदा ।
कपित्वमेव स स्वीयं प्रदर्शयति तत्तदा ॥ ४ ॥

---

शुचीन्—परिशुद्धान् श्वेताश्वेतान् दंतविप्राण्डजाः द्विजाः ।

## समासनामाङ्कित श्लोकद्वयी

श्रेयस्करं हि यत् कर्म कुर्यात्तत्पुरुषस्सदा ।
बहुव्रीहिसमासार्थं कर्मधारय भोःसखे ॥ १ ॥

वनिता च पुमांश्चापि द्वन्द्वं यद्यनुवर्तते ।
द्विगुणीभूय सौख्यं तदव्ययीभावमेति च ॥ २ ॥

## कविकाङ्क्षा

नवनवरसभावैः सत्कवीनां नवीनाः
कृतय इह बुधानां मानसं रंजयन्ति ।
सहृदयरसिकानां श्लाघनं यत्तदर्थं
तदिह कविवराणां एतदेकं हि भाग्यम् ॥ १ ॥

ये नाम केचित् प्रथयन्त्यवज्ञा-
मस्मकमित्याह महाकविस्सः ।
एवं स्थितेऽस्मत्कवितां नवीनां
को वा बुधो नन्दति वीक्ष्य साक्षात् ॥ २ ॥

नवमपि यदि काव्यं ज्ञानदं साधुरम्यं
ननु विबुधजनैस्ते पालनीयं प्रयत्नैः ।
तदिह सकलविद्यापाठशालासु तत्तत्
पठननियमनार्थं चाग्रहो द्राग्विधेयः ॥ ३ ॥

यशसेऽर्थकृते काव्यं इति तत्त्वविदोऽवदन् ।
कर्त्रैव सह सत्काव्यं नष्टं चेत् हन्त दुर्विधिः ॥ ४ ॥

# सत्काव्यमहत्त्वम्

शास्त्रेषु शक्तः कवितास्वशक्तः
न वेत्ति काव्यामृतपानसौख्यम् ।
वादाय शास्त्रं न मनो मुदे तत्
प्रहर्षदः काव्यरसो बुधानाम् ॥ १ ॥

कर्तव्यं सत्काव्यं हर्तव्यं रसिकबुधमनश्च तथा ।
प्राप्तव्यं परिषत्स्वपि धनवसनयशो मुखोच्छसन्मानम् ॥ २ ॥

मनः प्रसादं च धियः प्रबोधम्
सत्कर्मनिष्ठां जगतः स्वरूपम् ।
अत्रापि चामुत्र च सौख्यसिद्धिं
सत्काव्यमेकं कुरुते न चान्यत् ॥ ३ ॥

भासश्च हर्षो वरकालिदासः
बाणश्च दण्डी भवभूतिरार्यः ।
पूज्यश्च वेदान्तगुरुस्तथान्ये-
प्यद्यापि जीवन्ति यशःशरीरैः ॥ ४ ॥

त्रय्यन्तसारं किल भारतं श्री-
रामायणं भागवतं च गीता ।
इमानि काव्यानि जगत्त्रयेऽपि
जाग्रत्यमोघं शुभमाचरन्ति ॥ ५ ॥

काव्यालापान् वर्जयेदेवमुक्तं
यत्तद्युक्तं निन्द्यकाव्याय नान्यत् ।
एवं नो चेत् आदिकाव्यं कुतो वा
सर्वैरर्च्यं भाति रामायणं तत् ॥ ६ ॥

# तदा तदा समुत्पन्नं प्रक्षिप्तपद्यजातम्

अष्टौ कुचेष्टाश्चरणेन पङ्गोः
काणश्च दृग्भ्यां बहुधेति गाथा ।
अनङ्गतामेव समेयुषस्ते
सह्याः कथं मार ! भवन्ति चेष्टाः ॥ १ ॥

आलोकदर्शितसमस्तपदार्थजालं
व्यादानमीलनसमर्थकवाटपक्ष्म ।
काचावृतं तदपि भाति हि सप्रकाशं
वातायनेक्षणमहो गृहमानवस्य ॥ २ ॥

भुजगशयनशायी भक्तवृन्देष्टदायी
सहजविविधमायी संततं चानपायी ।
विहगपरिबृढांसोत्तुङ्गदेशप्रयायी
वितरतु कुशलं नस्सर्वसंपत्प्रदायी ॥ ३ ॥

मृदुपदा सरसा मधुरोर्जिता
स्फुरदलङ्कृतिभिश्च मनोहरा ।
प्रियतमा कविता वनिता स्वयं
रसमयं समयं कुरुते मम ॥ ४ ॥

महात्मानस्ते ते कति कति न सन्ति स्थिरगिरः
प्रणेतारश्श्रीशस्तुतिपर महाकाव्यवितते: ।
मुहुर्दर्शं दर्शं तदखिलकविव्यापककृतीः
श्रये लज्जाभारादपगतमदो मौनमधुना ॥ ५ ॥

कालिंदीपुलिने प्रकीर्णनलिने श्रीकृष्णविश्लेषतः
तन्मूर्तिस्मरणेन तद्विरचितक्रीडाविडंबेन च ।
तादात्म्यं प्रतिपद्य यत्परवशं जानाति नैवापरं
मच्चित्ते व्रजसंभवं हि भवतात्तद्यौवतं दैवतम् ॥ ६ ॥

काळिकाकेळिकालेऽपि शंभुर्वैभरसन्निभः ।
रामनाममधुस्वादं पिबन्मत्तः प्रहृष्यति ॥ ७ ॥

मत्कुणाः मशकाः रात्रौ दिवा सर्वत्र मक्षिकाः ।
देहमाक्रम्य बाधन्ते नर ! को नरकोऽपरः ॥ ८ ॥

॥ श्रीमते भगवते हयग्रीवाय नमः ॥

॥ श्रीमते रामानुजाय नमः ॥

# श्रीबृहत्प्रस्थपुरीप्रसन्नलक्ष्मीवेङ्कटेशमाहात्म्यम्

वाङ्मानसाविषयदिव्यविचित्रशक्ति-
कार्यस्वरूपमुखनित्यमहत्वपूर्णम् ।
श्रीवत्सकौस्तुभसुदर्शनपाञ्चजन्य-
भाजं भजेऽब्धितनया पतिमब्जनाभम् ॥ १ ॥

बृहत्प्रस्थपुर्यां वसन्तं प्रसन्नं
श्रिया भूमिदेव्या समालिङ्गिताङ्गम् ।
समाराधकाशेषभक्ताभिलाष-
प्रदानैकदीक्षं भजे वेङ्कटेशम् ॥ २ ॥

कलौ युगे श्रीहरिनामकीर्तनं
समस्तसन्मङ्गलदायकं विदुः ।
अतः प्रणौम्याप्तजनैश्च चोदितः
प्रसन्नलक्ष्मीवरवेङ्कटेश्वरम् ॥ ३ ॥

अरुणाचलपन्तनामकोऽभू-
च्चरणाब्जे दृढभक्तिमान् मुरारेः ।
तरुणान्विदुषश्च सोऽष्टपुत्रान्
परिणीतानभिनंदयन्नुवास ॥ ४ ॥

ते सर्वे तनया महीसुरपुराधीशस्य पूर्णादरा-
द्राज्ये दत्तमहोन्नताधिकृतयो दक्षा भृशं विश्रुताः ।
कस्याप्युद्धतदुर्गनेतुरखिलं कोशं गृहीत्वा बलात्
तेनास्मिन्नगरे पितुर्वचनतश्चक्रुश्च धर्मक्रियाः ॥ ५ ॥

प्रेरितो भगवतारुणपन्तो
माधवालयविनिर्मितिकार्ये ।
तान्सुतानथ समादिशदिच्छा-
मात्मनः कलयतेति विनीतान् ॥ ६ ॥

अधिकारबलादमी विशालं
धनबाहुल्यबलाच्च देवगेहम् ।
सुभगं सुदृढं त्वकारयन्य-
न्निजभक्तिप्रकरानुरूपरूपम् ॥ ७ ॥

तत्र प्रतिष्ठापयितुं मनोहरा-
मष्टाब्दबालप्रमितिं यथाविधि ।
श्रीभूसमेतामथ वेङ्कटेशितु-
र्मूर्तिं शुभामाकलयच्छिलामयीम् ॥ ८ ॥

ततः प्रतिष्ठासमये शुभान्विते
सुनिश्चिते तस्य शुभाकृतेर्हरेः ।
समस्तसंभारभरोपसंग्रहम्
चकार हर्षादरुणाचलस्सुधीः ॥ ९ ॥

तदन्तरेऽद्भुतं कर्म प्रावर्तत किमप्यहो ।
सत्यसङ्कल्पशीलस्य हरेश्शासनसूचकम् ॥ १० ॥

भक्तशिरोमणीनां अरुणाचलपन्तानां स्वप्ने भगवान् दत्तदर्शनः एवमुवाच । भो भक्ताग्रेसर ! मद्वचनमवधेहि आनेकल्लु अर्थात् हस्तिशिला ग्रामस्य देवमन्दिरे कस्यचन स्तम्भस्याधस्तात् अहं वसामि श्रिया सह । तत्स्थलात् मामानीय अस्मिन् रमणीये

मन्दिरे प्रतिष्ठापय इति। दिग्भ्रान्ता अरुणाचला आनेकल्लु ग्रामं गताः। तत्र परिशोधिते स्तम्भस्याधः श्रीभूसमेतः श्रीमन्नारायणः श्री वेंकटनायक प्रतिरूपः दर्शनं ददौ।

नरसिंहाकृतिश्रीशः स्तंभस्यांतः पुरा बभौ।
अद्यत्वधस्तात्स्तंभस्य रेजेऽर्चाकृतिरच्युतः ॥ ११ ॥

स्वल्पाकारमपि प्रसन्नवदनं भूम्याश्रियासंयुतं
दृष्ट्वाश्रीवरवेङ्कटेश्वरशुभाकारं हरिं विस्मितः।
स्वप्नोक्तेरथतथ्यतां च भगवच्छक्तिं च तां भावयन्
भक्त्योन्मत्त इवालिलिङ्ग भगवन्मूर्तिं कुमारं यथा ॥ १२ ॥

तत्रत्यानामनुमतिमथ प्राप्य भक्ताग्रगण्यः
सोऽयं नानाविधविभवतो मङ्गलातोद्यगीतैः।
आनीयैनां सुभगभगवन्मूर्तिमार्तिप्रहन्त्रीं
प्रायात्स्वीयां सपदि नगरीं तां बृहत्प्रस्थनाम्नीम् ॥ १३ ॥

निर्दिष्टे समये शुभे समयविद्विद्भिरप्यागमे
निष्णातैरितरैश्च भक्तनिवहैर्युक्तः प्रतिष्ठाक्रियाम्।
श्रीशस्यारचयद्ध्रुवस्समुदितस्यास्यैव शास्त्रक्रमात्
सोत्साहं च सवैभवं च भगवच्चेतस्समुल्लासकम् ॥ १४ ॥

सङ्कल्प्यया विरचिता हि महीयसी सा
मूर्तिर्न चात्र निहिता भगवन्निदेशात्।
अल्पाकृतिस्स्वयमयं कृतसन्निधानः
श्रीशः प्रतिष्ठित इह क्व नृणां प्रयत्नः ॥ १५ ॥

वीध्युत्सवार्थमधुना प्रतिमा हि कार्या
साढ्याकृतिर्यदि भवेत्तदिह प्रियं नः ।
इत्थं विचिन्त्य समकारयदाढ्यमूर्तिं
लक्ष्म्या भुवा च सह वेङ्कटनायकस्य ॥ १६ ॥

अस्याप्युत्सवविग्रहस्य शुभदा वेलाप्रतिष्ठाविधौ
तूर्णं स्वप्नगतोऽथ तस्य गृहिणः शौरिः पुनश्चावदत् ।
श्वः कोप्येष्यतिसाधुरत्र वशगस्तस्यास्मि संप्रार्थ्य तं
मां लब्ध्वाऽथ कुरूत्सवार्थमुचितं पट्टाभिषिक्तं त्विति ॥१७॥

कन्थाभस्त्रापिहितमहितध्वंसिनं श्रीनिवासं
स्कंधे कृत्वा भुवनमखिलं पर्यटन्कोपि साधुः ।
अन्येद्युस्तत्पुरमुपगतो नूत्नदेवालयस्य
प्रान्ते तिष्ठन्सुमजलफलैरर्चयामास देवम् ॥ १८ ॥

तस्यां निशायां भगवान्सभिक्षु
स्वप्नेऽवदत्ते शुभमस्तु साधो ।
तुष्टोऽस्म्यलं ते परिचर्ययाहं
निवस्तुकामोऽत्र विमुञ्च तन्माम् ॥ १९ ॥

तयोर्द्वयोरेकतरस्तु भक्तयोः
प्रदातुमादातुमथापरस्थितः ।
परस्परं तौ मिलितौ हरेर्वचो
वचः प्रसक्त्योचतुरास्तिकोत्तमौ ॥ २० ॥

भिक्षुस्ततस्स्ववशगं समदर्शयत्तं
श्रीभूयुतं तु चतुरङ्गुलमात्रमानम् ।
श्रीवेङ्कटेशमरुणाचलपंत एष
दृष्ट्वा मुदं न समवाप परंतु चिंताम् ॥ २१ ॥

कथं बताल्पाकृतिरेष देवो
देवालयेषूत्सवविग्रहस्स्यात् ।
न चापि हातुं किल शक्यते यत्
स्वप्नेप्युपादेयतमाच्युतोक्तिः ॥ २२ ॥

निर्वर्तयन्निह हरेरपि शासनं तत्
स्वेष्टस्य सिद्धिमपि लब्धुमहंयतेऽद्य ।
कृत्वोत्सवाय रचितो हि मया तमेव
कुर्याममुं शयनबेरमथेति मेने ॥ २३ ॥

अथाप्तमित्रैस्तनयैश्च सम्यक्
विमृश्यकस्साधुरसाधुरत्र ।
कोवेति संमन्त्र्य सनिश्चिकाय
स्वचिन्तितं साध्विति चैककण्ठ्यात् ॥ २४ ॥

सज्जीकृते परिकरे सकलेपि तत्त-
त्कर्मव्यवस्थितिमपि स्वजनैः क्रमेण ।
निर्वर्तयन्निजमतानुगुणं स गेही
कर्तुं तदाऽऽयततसंसदि निर्विशङ्कः ॥ २५ ॥

धिक्त्वां मूढ विशेषगर्वकुमते देवेऽपि तेऽवज्ञता
स्वल्पाकार इतीह मामभिभवस्याज्ञा न मे पालिता ।
इत्थं तन्निशि रुष्टधीस्स भगवान्स्वप्ने गृहस्थं पुनः
तं तोत्राहतिभिर्भृशं परितुदन्प्राचोदयत्स्वेप्सिते ॥ २६ ॥

अथ भयचकितोऽरुणाचलोऽसौ
निजमतिदोषभरस्य सानुतापः ।
भगवदभिमतानुसारमेव-
व्यवसितवांश्च विधातुमात्तनैच्यः ॥ २७ ॥

भक्त्युद्रेकवशात्स्वतो भगवतो भूरिप्रभावात्पुनः
प्रोत्साहाच्च जनस्य किं च बहुशो वित्तानुकूल्यादपि ।
तस्यैवाल्पतनोस्ससंभ्रममथ श्रीभूजुषोवैभवा-
च्चक्रेऽसौ विधिवन्महोत्सवपदे पट्टाभिषेकं हरेः ॥ २८ ॥

प्रसन्नवेङ्कटेश्वरस्सुसूक्ष्मदेहभागपि
स्फुरत्प्रभावदर्शिताद्भुतक्रियावलिर्महान् ।
श्रिया भुवा च संश्रितो दयामयोऽयमाश्रितान्
जनाननारतं स्वतः पुनाति पापिनोऽप्यहो ॥ २९ ॥

अणोरणीयानिति या श्रुतेर्वा-
गंगुष्ठमात्रः पुरुषोस्ति चेति ।
तामत्र वाणीं सफलां चिकीर्षुः
ह्रस्वाकृतिर्भाति हि वेङ्कटेशः ॥ ३० ॥

नित्यं सम्यग्देवपूजानुकूल्यं
कर्तुं सोऽयं क्षेत्रवित्तादिदानैः ।
श्रीशस्यास्याकारयन्निर्विघातं
कालेष्वर्चामर्चकैर्भक्तियुक्तैः ॥ ३१ ॥

अरुणाचलपंतोऽयं बहुविधसेवांविधाय मधुहन्तुः ।
सुसुखमुषित्वाऽप्तजनैर्विपुलयशाश्श्रीहरेः पदं भेजे ॥ ३२ ॥

अद्यापि तद्वंशभवा गृहस्थाः
भक्तास्तथाऽन्ये वरवेङ्कटेशम् ।
अर्चन्ति भक्त्या विविधोपचारैः
कल्याणसंवेशरथोत्सवाद्यैः ॥ ३३ ॥

या निर्मिता शिलामूर्तिरत्र स्थापयितुं पुरा ।
सा स्थपिता पुरेऽन्यत्र भक्तैरभ्यर्च्यतेऽधुना ॥ ३४ ॥

तामथोत्सवमूर्तिं तु राजधानीं नृपाज्ञया
प्रापयन्पापसंहर्त्रीं मनोज्ञामधिकारिणः ॥ ३५ ॥

महीसुराधीश्वरराजधान्यां प्रसन्नकृष्णालयगर्भगेहे ।
प्रतिष्ठितायापि विराजते सा यामानयंस्ते प्रतिमामितश्च ॥३६॥

अनेकलीलाचरितैर्विचित्रैः
मनांसि कर्षन्स्वयमाश्रितानाम् ।
विराजतेऽत्रैवमनन्तशक्तिः
प्रसन्नलक्ष्मीवरवेङ्कटेशः ॥ ३७ ॥

धनी कांश्चित्तीव्रां चिरमसहनीयामनुभव-
न्नभैषज्यां बाधां बत जठरगां वेङ्कटपतिम् ।
अमुं स प्रार्थ्यैतद्विपुलदयया निर्गतगदो
ददावस्मै स्वीयं कनककटिसूत्रं भगवते ॥ ३८ ॥

भक्तः कश्चिदनारतं भगवतो दीपं समीपेऽर्पयन्
तत्पित्रा प्रतिषिद्ध एष न ददौ दीपाय तैलं ततः ।
दीपार्चाऽथनिवारिता स भगवान्स्तस्यानुरूपं फलं
प्रादात्तस्य महागसः पितुरथांधत्वं द्वयोश्चक्षुषोः ॥ ३९ ॥

चिपिटं गुडनारिकेळमिश्रं
न ददौ कोपि गृही त्वरा प्रमादात् ।
भगवन्निशिबालवत्तमेत्य
स्वपनेऽपृच्छदमुं निजेप्सितं तत् ॥ ४० ॥

अथ स्वतः प्राथ्यं कुचेलहस्ता-
यथाभिपेदे चिपिटं स शौरिः ।
समर्पितं तद्गृहिणापरेद्यु-
स्तथाग्रहीद्वेङ्कटनायकोऽसौ ॥ ४१ ॥

इति बहुविधलीलाकार्यसुव्यक्तदिव्या-
द्भुततरमहिमाभिध्वंसिताशेषमोहान् ।
विपदपनयनेनाभीष्टदानेन लोकान्
नियमयति मुरारिर्भक्तिमार्गप्रवृत्तौ ॥ ४२ ॥

आचार्योत्तमदिव्यसूरिसुतपोनिष्ठादिभिस्स्वाश्रितैः
प्रेम्णाङ्गीकृतदेशमाश्रयसि यत्तत्रास्ति चित्रं किमु
सामान्यस्थलमेत्य तद्विदधता वैकुण्ठदुग्धांबुधि-
स्थानानूनमहो त्वया प्रकटितः कारुण्यसीमा हरे ॥४३॥

विविधकुसुममालालङ्कृतश्श्रीनिवासः
कनककवचभास्वद्रत्नभूषाभिरामः ।
मृदुफणिफणतल्पं संश्रितः पार्श्वदारो
हरति च जनचित्तं पापिनां पापराशिम् ॥ ४४ ॥

विश्वानन्दकरातिशायितमहासौन्दर्यनिघ्नीकृत-
श्रीभूमीदयिताद्वयानवरताक्रान्तस्वपार्श्वद्वयः ।
भोगीन्द्रायतभोगमध्यविलसन्मूर्तिः प्रसन्नाकृति-
श्श्रीनाथः कुरुते रथोत्सवकृतोत्साहो जगन्मङ्गलः ॥४५॥

स्रष्टुस्स्रष्टाप्यन्तकोप्यन्तकस्य
प्राक्चप्राचामात्मनामान्तरात्मा ।
ईशस्येशः कारणं कारणानां
कस्साकल्यात्स्तौति नारायणं तम् ॥ ४६ ॥

अर्च्यमर्चकगणोऽर्चतु भक्त्या
वेङ्कटेश्वरममुं नियमेन ।
लोकमङ्गलकरो विभवाढ्यः
श्रीपतिर्जयतु दर्शितशक्तिः ॥ ४७ ॥

इति जगद्गुरुशिङ्करार्यैः प्रसन्नलक्ष्मीश वेङ्कटेशस्य ।
संक्षिप्तं चरितमिदं भक्तिभरेणाह भक्तमोदाय ॥ ४८ ॥

# सुभाषितानि

लोके प्रसिद्धानि सुभाषितानि ।
वाचां प्रभेदेन नवी भवन्ति ॥ १ ॥

मुक्त्वा विरक्तानितरान् नरान् कान्
जहाति लोके धनलालसा सा ॥ २ ॥

घटं विधातुं किल मासकालः
तद्भंजनायार्धनिमेषमात्रम् ॥ ३ ॥

सम्यग्विचार्यैव गुणान्तरेण
कुर्वीत सख्यं नततस्त्यजेत्तत् ॥ ४ ॥

अस्थिर मनसां स्नेहः न सुखाय परं तु दुःखाय ॥ ५ ॥

किं जानीते श्रवणमधुरां कासरो गानरीतिं ॥ ६ ॥

स्वप्राक्कर्मानुगुणफलभाक् मानवो धीयुतोऽपि ॥ ७ ॥

अन्योच्छ्रायं न किल सहते स्वप्रतिष्ठैकनिष्ठः ॥ ८ ॥

मांसाहारी न वहति दयां जन्तुषु क्रूरकर्मा ॥ ९ ॥

अन्यैस्साध्यं न खलु धृतिमानीक्षते कार्यसिद्ध्यै ॥ १० ॥

विद्याभ्यासे नहि कुतुकिनां देहसौख्येऽभिलाषः ॥ ११ ॥

शङ्कातङ्काकुलितहृदयः शङ्कते सज्जनेऽपि ॥ १२ ॥

प्रज्ञाहीनश्शठजनगिरा वंच्यतेऽन्यानुवर्ती ॥ १३ ॥

वृद्धोप्यन्तर्भजति विकृतिं मुग्धनारीविलासैः ॥ १४ ॥

भूयः श्रुत्वाप्युचितवचनं नैति मूर्खो विवेकम् ॥ १५ ॥

आपत्स्वप्यसहायकैः किमु फलं मित्रैश्च तैर्बन्धुभिः ॥ १६ ॥

लोकोद्धारं जगदवनतिं कर्तुमेकाङ्गनालं ॥ १७ ॥

पाण्डित्यमाचारविवर्जितं यत्<br>
व्यर्थं शुनः पुच्छमिवात्र पुंसाम् ।<br>
गुह्यं न चाच्छादयति स्वयं तत्<br>
न दंशमक्ष्यादिनिवारणेऽर्हम् ॥ १८ ॥

विवेकिनां वाक् सततं हितप्रदा ॥ १९ ॥

परुषमपि गुरूणां बुद्धिबोधार्थमुक्तं<br>
वचनमनुसरन्याति शिष्यो महत्वम् ।<br>
खनितलगतरत्नं श्रेष्ठमप्यत्रशाणो-<br>
त्कषणमधिगतं तद्भाति मौलौ नृपाणाम् ॥ २० ॥

सच्छीला स्त्रीः पतिमपथगं चापि संसेवते तं ॥ २१ ॥

पूर्णे कुम्भे न चलति जलं नीयमानेऽपि दूरं ॥ २२ ॥

अज्ञः क्रूरो यदि नरपतिस्तत्प्रजानां न सौख्यम् ॥ २३ ॥

प्राणापत्स्वप्यचलसुगुणाः नत्यजन्त्यार्यधर्मम् ॥ २४ ॥

पत्युश्शीघ्रागमनपिशुनात्पत्रतोऽप्यद्य पूर्वात् ।<br>
साध्वी क्लिश्यत्यधिकविरहा यावदायाति भर्ता ॥ २५ ॥

संपत्सु नृणां समुपेत्य दूरे विपत्सु मुञ्चंति नराः कृतघ्नाः ॥२६॥

सेवावृत्तिर्नरकसदृशी दुर्जनानां समीपे ॥ २७ ॥

यथा पयोधावमृतं विषं स्त-
स्तथा नरे सन्ति गुणाश्च दोषाः ॥ २८ ॥

केचित्सन्ति स्वयमपथगाः धर्मबोधे प्रवीणाः ॥ २९ ॥

बाल्ये युवत्वेऽप्यथ वार्धके स्त्रीः
क्रमेण रक्ष्या पितृभर्तृपुत्रैः ॥ ३० ॥

प्रागर्हतां प्राप्य सुशिक्षणेन कुर्यात्स्थिरं कर्म महद्यशोर्थी ॥ ३१ ॥

जीवितसमये नृणां न गुणः प्रसरति यथा मृतेः पश्चात् ॥ ३२ ॥

उल्लाघो भिषजं वा शिष्यस्स्वगुरूनधीतवरविद्यः।
लतरणादथ तारकजनपि नैव स्मरंति जगति जनाः ॥ ३३ ॥

कालाद्बहोरथसतीं धृतगर्भभारां।
पश्यन्पतिः क इह नैति मुदं सुतार्थी ॥ ३४ ॥

विरोधिना किं पितुरात्मजेन
परानुरक्तप्रियया सुखं किम्।
किं वाऽविधेयैरलसैश्च भृत्यैः
कोऽस्त्यूषरक्षेत्रशतेन लाभः ॥ ३५ ॥

क्षिप्रं कुरुत सत्कर्म यदा मनसि जायते।
अध्रुवे जीविते नृणां के वयं द्रष्टुमायतिं ॥ ३६ ॥

सरोवरे स्तब्धजले प्रवेशात्
प्रभंजनादूर्मिरुदेत्यनल्पा।
परस्परस्निग्धजने तथाऽन्ये
प्रविश्य कुर्वन्ति मिथो विरोधम् ॥ ३७ ॥

ख्यातस्य वैद्यस्य सुतो रुजार्तः
भतावृता मान्त्रिकधर्मपत्नी।
दैवज्ञपुत्री विधवेत्यमीभिः
व्यक्तः प्रभावो नियतेरलंघ्यः ॥ ३९ ॥

स्वयं विवेकी न च नैव वाचं
शृणोति दर्पेण हितैषिणां वा।
दुर्वृत्तिदोषेण विपद्गतेऽते
किं वा फलं स्यादनुतापतप्ते ॥ ३९ ॥

भर्तरि मातरि पितरि स्वसरि च जामातरीतरेष्टजने।
प्रेमास्ति स बहुभिन्नः तत्तद्बन्धुत्वभेदेन ॥ ४० ॥

यशोधनं तद्धि धनं नृणां महत्
सुवर्णरूप्यादि धनं विपत्करम।
स्थिरं परैरप्यपहर्तुमक्षमं
यशोधनं यन्नतथेतरद्धनम् ॥ ४१ ॥

आशाधीनास्सकलजनताधीनतां यात्यजस्रम् ॥ ४२ ॥

वृद्धः क्रुद्धो यदि स लभते स्वेप्सिताद्दुःखमेव ॥ ४३ ॥

सन्तस्सन्तोषचित्ताः नियमितमनसः दुःखसौख्योपभोगे ॥ ४४ ॥

यथा कुरूपाः स्ववपुः परिष्क्रियाविधौ यतन्ते न तथा सुरूपिणः ॥४५॥

कठोरवाचं सहते च निन्दां
तितिक्षतेऽयं क्षमते च हिंसाम्।
साधुः किलेत्येवममुं प्रधर्ष्यन्
दुष्टो भवेत् तच्छमवह्निदग्धः ॥ ४६ ॥

स्वासामर्थ्यजदोषमन्यथयितुं कार्येषु केचिन्नराः
    व्याजैरन्यजनेषु मन्तुममितं चारोपयन्ति स्वयम्।
दैवाल्लब्धनिजेप्सितार्थनिचयाश्चेत्ते तदा दर्पतः
    स्वीयं पौरुषमेव हन्त कथयन्त्येवं हि लोके जनाः ॥ ४७ ॥

विद्युच्छक्तौ शठेपीभे जागरूकतया भवेत्।
अपि सम्यक्परिचिताः घ्नन्त्येवानवधानिनः ॥ ४८ ॥

ये कार्यनिर्वाहविधौ समर्थाः
    जल्पन्ति ते जातु वृथैव नैव।
वचांसि तेषाममितानि ये तु
    क्रियोपपत्तिक्रमसाधनेऽज्ञाः ॥ ४९ ॥

यथास्ति मान्यता लोके पुंसः ख्यातस्य धीमतः।
तथैव स्वगृहे नैव जायते तस्य गौरवम् ॥ ५० ॥

उद्वेगमग्नचित्तस्य पुरस्स्वोत्कर्षजल्पनम्।
प्रचारोऽज्ञातवार्तायाः नृणां लाघवकारणम् ॥ ५१ ॥

निष्कारणं केचिदसूयया ऽन्धाः
    वैदुष्यपूर्णप्रतिभायुतानाम्।
प्रशस्तिसम्माननगौरवादीन्
    वीक्ष्य व्यथन्ते परितप्यमानाः ॥ ५२ ॥

द्रव्यव्ययक्लेशकथापि नास्ति
    शरीरभारप्रभृतिव्यथा न।
प्रशंसनार्हा च जनैस्समस्तैः
    स्त्रीणां हि लज्जा सहजा विभूषा ॥ ५३ ॥

बली विधिर्विरोधी च सर्वत्रापि महीतले।
धीमानपि मतिभ्रान्त्या स्खलत्यखिलकर्मसु ॥ ५४ ॥

पूर्वजन्मकृताभ्यासवासनेहापि जन्मनि ।
बाल्ये स्वयं स्फुरत्येव गीतचित्रकलादिषु ॥ ५५ ॥

देशकालानुगुण्येन वेषभाषाऽशनादिकम् ।
परिवर्तयतां सौख्यं क्लिश्यन्त्येवान्यथा स्थिताः ॥ ५६ ॥

भोजनानुपदं भक्ष्यं मैथुनानुपदं प्रियाम् ।
पुनस्तदैवोपभोक्तुं समर्थोऽपि न चेच्छति ॥ ५७ ॥

वृद्धस्य भार्या युवती संगीतं बधिरस्य च ।
कृपणस्य धनं भूरि दुःखाय न सुखाय हि ॥ ५८ ॥

उद्दिष्टकार्यसिद्धिश्चाप्यारोग्यं च यशः स्थिरम् ।
सन्मित्र-सत्सुताः पत्नी सती पुण्यवतामिमे ॥ ५९ ॥

मद्यापणस्य गोष्ठस्य वलचित्रगृहस्य च ।
यन्त्रकार्यालयस्यापि निकटे वसतिं त्यजेत् ॥ ६० ॥

पक्षिणः फलवृक्षांश्चदीनाः दानिवरानपि ।
मार्गमाणाः प्रपद्यन्ते दानिनां सुकृतं महत् ॥ ६१ ॥

ददाति दीनोऽपि च दित्सुरुत्सुकी
वशेस्वकीयेऽस्तिं यदल्पमेव वा ।
धनैः प्रपूर्णः कृपणः तृणांकुरं
प्रदातुमप्यात्मनि हन्त नेच्छति ॥ ६२ ॥

नास्तिक्याधिक्यदोषेण विभ्रान्तमतयो जनाः ।
देवर्षिपितृपूजास्तु मूढकर्मेति मन्वते ॥ ६३ ॥

पत्नी गंगा सूनुरिन्दुः पयोधेः तौ द्वौ मौलिं शङ्करस्याधिरूढौ ।
पारावारो नारुरोहासमर्थः सर्वस्सर्वं नैव शक्नोति कर्तुम् ॥ ६४ ॥

संगस्सतां सद्भिरुदेति पुण्यात् ॥ ६५ ॥

मनः प्रसादादधिकं सुखं किम् ॥ ६६ ॥

श्रेयांसि नूनं बहुविघ्नवन्ति ॥ ६७ ॥

प्राप्तव्यमप्राप्य कुतोऽस्ति शक्तिः ॥ ६८ ॥

वृथा न जल्पन्ति हि कार्यदक्षाः ॥ ६९ ॥

निजेष्टसिध्यै परुषा हि नार्यः ॥ ७० ॥

नूनं विधेरेव गरीयसीच्छा ॥ ७१ ॥

के नाद्रियन्ते सुजनाः गुणज्ञैः ॥ ७३ ॥

असतामिमितां शक्तिं ददते दधते तमः ।
हरते हरतेजोऽपि कलये कलये नमः ॥ ७४ ॥

विद्याचाराय बोधाय रतये सूनवे सती ।
धनं दानाय भोगाय कीर्तये मुक्तये जनिः ॥ ७५ ॥

न स्वामिभक्ताः स्वसुखेऽनुषक्ताः ॥ ७६ ॥

पूज्यत्वहेतुस्सुगुणी हि नान्यत् ॥ ७७ ॥

स्नेहातिरेकः किल पापशंकी ॥ ७८ ॥

सतां हि यत्नाः न वृथा भवन्ति ॥ ७९ ॥

पात्रेषु दत्ताः हि फलन्ति विद्याः ॥ ८० ॥

शुद्धात्मनो मनसि बहिरप्येकरूपा भवन्ति ॥ ८१ ॥

परिवर्तयितुं नृणां स्वभावं
प्रभवन्त्येव हि जातु नोपदेशाः ।
ज्वलनेन जलं सुतप्तमुच्चैः
पुनरप्येति हि शैत्यमेव पश्चात् ॥ ८२ ॥

दृप्तो हि न वेत्ति परस्य सत्वम् ॥ ८३ ॥

श्लाघयन्पुरतस्सर्वान्परोक्षे दूषयन्खलः ।
वृथा जीवति लोकेस्मिन्विश्वासानर्ह एव सः ॥ ८४ ॥

दुःखदां ममतां मुञ्च मोक्तुं तां यदि दुर्बलः ।
सर्वत्र सर्वभूतेषु ममता समतास्तु ते ॥ ८५ ॥

ऋणाधिक्यं कुपुत्रश्च कलहो नित्यशो गृहे ।
व्याधिपीडाप्यसत्सेवा पूर्वपापफलानि हि ॥ ८६ ॥

कूर्मपृष्ठस्य काठिन्यं श्वपुच्छस्य च वक्रता ।
दुर्जनानां च दौर्जन्यं न धात्राऽपि निवार्यते ॥ ८७ ॥

संपदा जायया वाऽपि किं फलं नित्यरोगिणः ।
किं फलं दुष्टवृत्तीनां सद्विद्याध्ययनेन वा ॥ ८८ ॥

मक्षिको व्रणमेवैति शरीरे सञ्चरन्यथा ।
सद्गुणाननवेक्ष्यैव परदोषे खलस्य दृक् ॥ ८९ ॥

चराचरान्वशीकृत्य बुद्धिशक्त्या नरश्चिरात् ।
जृम्भमाणोऽपि नियतेः वश्यः क्लिश्यति कर्मणा ॥ ९० ॥

धनाढ्योऽपि बलिष्ठोऽपि विद्वानपि महानपि ।
उच्चाधिकारगण्योऽपि स्त्रीमोहाद्याति लाघवम् ॥ ९१ ॥

कलहं कलहंसेन करोत्वेकाकृतिर्बकः ।
नीरक्षीरविभागे तु हंसएवात्रशिष्यते ॥ ९२ ॥

रक्तं मांसं च मेधोऽस्थित्वक्चयत्सृष्टेस्तु साधनं ।
तत्र देहे विमुह्यन्ति प्राज्ञा अपि बताद्भुतम् ॥ ९३ ॥

संदेहो यत्र कर्तव्यो विस्रंभस्तत्र निश्चलः ।
विश्वासार्हस्थले शङ्का यस्य तस्य विपद्ध्रुवा ॥ ९४ ॥

अन्यथा रचिते कार्ये दोषं दृष्ट्वापि केचन ।
तदेवोचितमित्याहुः स्वदोषाच्छादनाय हि ॥ ९५ ॥

वराङ्गनानामङ्गेषु शृङ्गारेङ्गितभङ्गिषु ।
यस्सङ्गतान्तरङ्गोऽस्ति सोऽनङ्गाद्भङ्गमश्नुते ॥ ९६ ॥

बाल्येऽनभ्यस्तविद्यस्य वसतो दुर्जनैस्सह ।
अशृण्वतस्सतां वाचं सर्वथा दुःस्थितिः स्थिरा ॥ ९७ ॥

सदा शङ्का सदा भीतिः सदा सन्देहविभ्रमः ।
यस्यास्ति किं स कुरुते स्वश्रेयः कर्म मन्दधीः ॥ ९८ ॥

मांसाशिनां दया नास्ति गणिकानां न पापभीः ।
मद्यपानां न लज्जास्ति त्रयं नास्ति दुरात्मनाम् ॥ ९९ ॥

आप्तैः स्वबन्धुभिः प्रोक्तं न शृणोत्यभिमानतः ।
स्वयं मूढोऽपि सर्वज्ञभावयुक्तो विनश्यति ॥ १०० ॥

## जग्गुशिङ्गरार्यकवि प्रशस्तयः

येऽस्मत्पूज्यपितामहास्सुकृतिनस्स्वप्नप्रसन्नेन्दिरा-
पांगालोकतरङ्गसेकविलसत्स्वान्तास्तदीयाज्ञया ।
भक्त्या सूत्रपथानुगामनुपमां तां वृत्तमुक्तावलीं
निर्मायात्र समार्पयन्यदुगिरौ विष्णोः प्रियायै मुदा ॥ १ ॥

शिङ्गरार्याभिधानानां पौत्रस्तेषां महात्मनां ।
नारायणार्याभिख्यानां पुत्रोऽहं शिङ्गराह्वयः ॥ २ ॥

अन्यैरकथितभावैः अचुम्बितार्थैर्मनोज्ञपदगुम्भैः ।
काव्यं करोमि यदुगिरिपरिबृढचरितांचितं च तत्कृपया ॥३॥

किं वाधीतमनेन हन्त यतते मूढोऽप्यवाप्तुं यशः
वाग्देवी निहता बतेदृशजनैरित्याहुरेके जनाः ।
नैपुण्यं पुनरेतदेव यदसावज्ञोप्यतानीन्नवं
रम्यं काव्यमितीरयन्ति गुणिनो लोको हि भिन्नाशयः ॥ ४ ॥

अहमिह न हि शक्तः काव्यकार्ये तथाऽपि
व्यरचयमधिनेतुः श्रीपतेराज्ञयैव ।
मयि न जगति निन्दा स्तोत्रवाणी च नृणाम्
इति नियतमतेर्मे निन्दया श्लाघया किम् ॥ ५ ॥

सीमातीतवचोवने कविपुलिन्दालोडिते स्पर्धया
तत्तीक्ष्णप्रतिभात्मजालविलुठम्द्भावादिनानामृगे ।
जग्धाशेषरसे किमप्यभिनवं संप्रेप्सुना साधनैः
हीनेनाप्यमुना मया मृगगणो लुब्धेन लब्धः कियान् ॥

न तु श्लाघ्या नूनं कृतिरियमथापि श्रमविदो
विदांकुर्वन्त्येनां प्रकटितरमानाथचरिताम् ।
स्वयं शुक्तिः कांक्षापदविरहिता प्रेक्षितगुणैः
प्रतिग्राह्या सैव स्फुरदनघमुक्ताफलभरा ॥

षट्कं शिङ्गरार्यस्यैव स्वकीये यदुशैलचम्पूप्रबन्धे 15—11—1930

—२—

व्रजभुवि यदुपुङ्गवस्य वृत्ता-
न्यनुकृतराघवजन्मचेष्टितानि ।
विरचितमधिकृत्य काव्यमेत-
ल्ललिततमं विबुधोपहारयोग्यम् ॥ १ ॥



The Department of Samskriti Prasara, honoured Sri Jaggu Singra Iyengar at Tumkur by presenting a shawl on the occasion of receiving the honourarium of Rs. 500/- (D. 2-11-1981)



Sri Jaggu Singra Iyengar receiving the state award from Sri Subbayya Shetty the education minister (1979)



Function celebrated at the time of releasing the drama
"*Showri shauriyam*" of Sri Jaggu Singra Iyengar

कृतिवरमुपवर्ण्य चित्रकूटं
तनुयमकं यमकं सितार्थमाह ।
कविरवनिसुतारघूद्वहोक्ति-
प्रचुरमसावपि पंडितादरार्हः ॥ २ ॥

इति कृति युगळीमवेक्ष्य साक्षात्
यदुगिरिकौशिकशिङ्गरार्यबद्धाम् ।
यदुगिरियतिराजराजसम्प-
त्सुतमुनिरित्थमतंतनीत्प्रशस्तिम् ॥ ३ ॥

—अयं सम्पत्कुमारमुनेः

[शा. शक. सं १८५३ प्रमोद. सं. माघकृष्णद्वितीया बुधवासरे]

※ ※ ※

लालित्यमर्थगरिमा रसभावरीति-
प्रागल्भ्यमुख्यसुगुणा धुतदोषगन्धाः ।
काव्येषु कौशिककुलोद्भवशिङ्गरार्यैः
बद्धेषु पण्डितमनांस्यनुरञ्जयन्ति ॥ १ ॥

पदानां गाम्भीर्यं सरसमधुरार्थस्समुचितः
रसालङ्कारादिप्रचुरगुणसन्दर्भमहिमा ।
अनन्यास्पृष्टास्तेऽप्यतिसुभगभावाश्च बहुशः
प्रबन्धानामस्य प्रविदधति शोभामभिनवाम् ॥ २ ॥

एतादृशोऽस्य सुकवेः कवितालतायाः
स्वैरोच्छ्र्याय नरपालमणिप्रसादः ।
विद्वज्जनानघकृपास्यवलम्बनं चेत्
सा विस्तृता भवति नूनमितोऽपि रम्या ॥ ३ ॥

—अयं महामहोपाध्यायस्य पण्डितरत्नस्य लक्ष्मीपुरं श्रीनिवासाचार्यस्य

श्रीमद्यादवशैलवासरसिकैर्विद्यानिषद्यात्मकैः
विद्वत्सन्ततिसिन्धुशीतकिरणैः स्वाधीनवाग्गुंभनैः ।
जग्गु श्रीयुतशिङ्गरार्यविबुधैर्विद्वन्मणीनां मुदे
सृष्टास्सूक्तिततीरतीवमधुराः बह्वीस्समालोकयम् ॥ १ ॥

अनायासमाविर्भवद्भिः पदौघैः
सुहृद्यानि गद्यानि पद्यानि सद्यः ।
सृजन्नेष साधुः कवीनां वतंसः
हरत्यन्तरङ्गं समेषां बुधानाम् ॥ २ ॥

एतत्प्रणीतमिह कृष्णकथारहस्य-
संज्ञं प्रबन्धमतुलं सुमनोमनोज्ञम् ।
द्राक्षासदक्षमृदुसूक्तिततिप्रगल्भं
दृष्ट्वा प्रमोदभरनिर्भरहृद्भवामि ॥ ३ ॥

श्रीचित्रकूटगिरिवर्णनजागरूकं
अत्यन्तभोग्यमभिरामपदैकराशिम् ।
सद्ग्रन्थरत्नमदसीयमवेक्षमाणः
दासः प्रमोदमधिगच्छति दिव्यभव्यम् ॥ ४ ॥

एवं नाम हरेर्गुणाननवधीनाम्रेडयन्सूक्तिभिः
सोऽयं पण्डिततल्लजः कविवरः श्रीशिङ्गरार्याभिधः ।
भक्तानाममृतोपमाः कृतिततीर्नित्यं समुद्भावयन्
जेजेतुंक्षितिमण्डलेऽत्र सततं जीवातुभूतस्सताम् ॥ ५ ॥

काञ्चीवादिभयंकरवंशीयाण्णंगरार्यदासाग्रचः ।
हर्षप्रकर्षविवशो व्यालिखत् प्रेम्णा प्रशस्तिपत्रमिदम् ॥ ५ ॥

—षट्कं प्रतिवादिभयंकराण्णंगरार्यस्य प्रजोत्पत्ति सं. कर्कट पूर्णिमायाम्

पैतामहीं सरणिमप्यथ काव्यसृष्ट्यां
पैतामहीमपि कलां सुकरं प्रपद्य ।
नारायणप्रथमसूनुरयं व्यतानीत्
नारायणप्रथितयादवशैलचम्पूम् ॥ १ ॥

यमकरोद्यमकोद्यदमोघसत्
कवितया कविरेष नवं शुभम् ।
यमकरत्नमहोदधिमाधवं
जनकजापतिवृत्तमुपाद्रिये ॥ २ ॥

हृद्यगद्यमृदुपद्यसमुद्य-
न्नव्यकाव्यमभिभाव्य सुभव्यम् ।
श्रव्यनव्यनयवाक्यसुरम्यं
मान्यमान्यमिह नान्यदितस्स्यात् ॥ ३ ॥

नारायणाङ्कां स चकार कान्तां
नीतिं च सार्वज्ञपदाङ्कितान्तां ।
कर्णाटभाषाललितां हितां तां
किं ब्रूमहे चारुचटुं च कान्तां ॥ ४ ॥

—चतुष्टयं श्री रामशर्मणः

※ ※ ※

अयि मुदात्तमुदात्तधियस्तव
स्तवचयं पठताऽक्षमया मया ।
सुरगिरामधुना मधुनाऽदृता
मधुरता रसिता रसिकादृता ॥ १ ॥

अधुनातनोऽपि मधुवैरिणः कथा
मधुनातनोषि विदुषां मनोमुदम् ।
मुरलीधरस्य चरणाब्जरागिणाम्
हरिनाम्नि जातु न हि यातयामता ॥ २ ॥

प्रहितं प्रतिपत्रमये भवता
कृतिना कृतकेतरशीलवता ।
विनयातिशयप्रभवां विदुषां
अविकत्थनतामवबोधयति ॥ ३ ॥

सल्लापस्सुहृदा समं सुखकरस्संतोषसंवर्धकः
तत्राप्युत्तमपण्डितेन कविताचातुर्यसच्चेतसा
तस्मात्त्वामहमद्य नम्रशिरसा याचे न चेच्चेतसा
काचित्ते क्वचिदप्युपद्रववृतिः पत्रं तवौदन्तकम् ॥ ४ ॥

बालधन्विकुलभूषणस्य ते
पत्रिका विबुधमौलिभूषण ।
अध्यगामि कुरुते च मे मुदं
स्निग्धभाव-मधुरोक्तिमण्डिता ॥ ५ ॥

शिङ्करार्य ! कविवर्य ! ते कृतीः
मङ्गलात्मक-मनोहराकृतीः ।
व्यंग्यभावरसवच्चमत्कृतीः
तुङ्गधीः कविरधीत्य मोदते ॥ ६ ॥

अभिनवभवभूतिर्नूतनः कालिदासः
धृतवपुरपरो वा बाणभट्टोऽथ दण्डी ।
पुनरपि जनिमान्वा भास एवैष हर्षः
जयति जगति जग्गूशिङ्करार्यः कवीन्द्रः ॥ ७ ॥

—तिरुच्चूर् सुब्बरामभट्टार्यस्य

जगदवनं गजवदनं कवींद्रमाराध्य शिङ्गरार्यं च ।
प्रणमति बुधमूर्धन्यं संस्कृतवाक् रामकृष्णभट्टोऽयं ॥ १ ॥

निगमवपुः प्रणवात्मोपक्रमतां नर्तितुं मनोरङ्गे
अन्धतमसापहर्ता भजतामपरोक्षसानुभूतिर्नः ॥ २ ॥

जयति जगदेकसूत्रं पवित्रमिदमत्र संस्कृतं सेव्यं ।
सुमनोभिर्येन नराः सुखमश्नुवते सुधर्मसम्मोदम् ॥ ३ ॥

दृश्यश्राव्याख्यनानाविभवसुमधुरं लीलया काव्यसर्गं
ह्याश्रान्तं यो विधत्ते हृदयकुहरसद्भक्तिवर्तिं प्रसिञ्चन् ।
उद्बुद्धप्रातिभश्रीश्रुतधृतपटुताधारया तं धुरीणं
काव्यात्मानं नमामो धिषणसधिषणाभूषणं शिङ्गरार्यम् ॥ ४ ॥

प्राणैषीन्नाटकं यत्प्रमुदितविबुधव्रातमक्रूरवृत्तं
धीरोदात्ताधिकाराद्भुतहरिचरितं ह्यग्रजन्मा रसाढ्यैः ।
संध्यंगैः पञ्चभिश्चोपरचितसुषमं हृद्यसंगीतकं तत्
विद्वद्भुर्यैस्सुधार्यं मणिमयमनघं शौरि शौर्यं सुमूल्यम् ॥ ५ ॥

क्रूरः कूटनयोऽनयत् स्वसृशिशून् सप्तापि याम्यक्षयं
यो लीलामनुजाकृतिं यदुपतिं पापोऽजिघांसद्धरिम् ।
तं कंसं प्रतिमानभासुरकविव्यापारसाराऽचिरात्
भक्तिध्यानपरं सुवीरमतनोद्धन्या भवद्भारती ॥ ६ ॥

ललितपदन्यासा ते कविताशिञ्जाननूपुरारावा ।
कस्य न रसिकस्य मनः शय्याविच्छित्तिकीर्तिभाग्भवति ॥ ७ ॥

यशोऽपूर्वं सूते सुरभयति लोकं सुरगवी-
रसस्यन्दैर्हव्यैर्हरिहुतभुजं भक्तिसमिधा ।
धिनोत्युच्चैस्सूक्तैरपि तव गुणोदारपरिष-
च्छ्रिये भूयात्काव्यक्रतुरमृतसुप्रीतविबुधा ॥ ८ ॥

प्रतिभामहसा श्रुतसद्यशसा
वचसा मधुवर्षमुचा सहसा ।
वयसा गुरुणा च सतां हृदयं
हरतीह भवान् कवितासविता ॥ ९ ॥

जयतात् सुरभारती चिरं
पिबतात् काव्यरसं जनो विना ।
अवलेपविषं च भूतलं
भवतात् धर्मसुशर्महर्म्यकम् ॥ १० ॥

विज्ञापयन्नेवमयं प्रणामैः
अदूष्यवैदुष्यवशंवदस्ते ।
आरोग्यभाग्यं भगवन्तमन्तः
संप्रार्थ्य विश्राम्यति काव्यपत्रात् ॥ ११ ॥

निजपदपरिरम्भात् लोकमापावयन्तः
गरुडगुरुविनेयाः सत्यवृत्तात्मभासः ।
मम गुणपरमाणून् क्षुद्रजन्तोर्भवन्तः
सुगुणघृणिदिनेशाः द्योतयन्तो ह्युपास्याः ॥ १२ ॥

शोकं हृदोऽपनयतीह मनश्चलत्वं
वाचं तनोति मधुरां मुखकान्तिमन्यां ।
मेधां च पुष्यति नरस्य जनप्रियत्वं
शांतिं सुधेव जनयत्यखिला भवद्वाक् ॥ १३ ॥

सम्बन्धआभाषणपूर्वको यः
प्रोक्तस्स नौ पत्रमुखेन जातः ।
अतो दृढस्साप्तपदीनबन्धो
ह्यावामदृष्टावपि संयुनक्ति ॥ १४ ॥

चित्रे दृष्ट्वा युवामीड्यौ दम्पती सौम्यदर्शनौ ।
अरुन्धतीवसिष्ठौ वेत्यनमं मनसा मुदा ॥ १५ ॥

वयसा वचसा महसा मनसा
विदुषां च मतेन गुणैर्महितैः ।
विनयेन भवान् नहि कस्य महान्
नमसापचितेः पदमत्र भवेत् ॥ १६ ॥

गुरुसमानसुमान्यपदस्य ते
शिरसि सूरिगणस्य विराजतः ।
दुरितहारि सकृल्लघुदर्शनं
वरदसद्दययाद्य सुसिद्ध्यतात् ॥ १७ ॥

कलिमलकलुषेऽधुना नृचित्ते
स्फटिकविशुद्धहृदो भवादृशास्तु ।
क्षितितलमणिभूषणानि सन्तः
सुकृतिभिरेव सुखं भवंति सेव्याः ॥ १८ ॥

—विठ्ठलरामकृष्णभट्टार्यस्य

# मनीषा पञ्चकम्

सौजन्यसौभाग्यपवित्रचित्ताः
महर्षिसंकाशपराध्र्यवृत्ताः ।
सानन्दविद्योतितलोकवार्ताः
भवादृशाः कस्य न पूजनीयाः ॥ १ ॥

पूर्वजन्मसुकृतस्य विपकं
मामकीनमुदितं फलमेतत् ।
यन्ममोपनतमात्मसमृद्ध्यै
संगतं ह्यघहरं भवताऽद्य ॥ २ ॥

यथा यथा मे हृदयं त्वदीयान्
विभावयत्यात्मगुणानुदात्तान् ।
तथा तथाऽऽसेऽवशमेष नूनं
मदन्तरात्मा परवानमीभिः ॥ ३ ॥

महाभाग्यमिदं बाढं मदीयं स्यान्महोदयः ।
शीघ्रं संपत्स्यते चेन्मे भवद्दर्शनसुक्षणः ॥ ४ ॥

अपारकरुणानिधेरमरसुंदरीकुन्तल-
द्विरेफपरिचुम्बितस्वपदपकजस्येशितुः ।
अनुग्रहत आवयोर्भवतु भाविजन्मस्वपि
प्रगाढमुरुसौहृदं ह्युभयकापवर्गास्पदम् ॥ ५ ॥

—विठ्ठलरामकृष्णभट्टार्यस्य

## आळ्वार्नमनम्

शठरिपुपरकालविष्णुचित्तान्
   मधुरकविं मुनिवाहनं च गोदाम् ।
यतिपतिमपि भक्तपादरेणुं
   वरकुलशेखरमानतोऽस्मि नित्यम् ॥

## हयग्रीवः

चन्द्रमण्डलमध्यस्थं
   पुस्तहस्तं श्रियान्वितम् ।
शङ्खचक्रधरं विष्णुं
   हयग्रीवं धिये श्रये ॥

## हनूमान्

श्रीमन्परात्परविभो जगदीश राम
   सीतावियोगभृशदुःखपयोधिमग्नः ।
जीवो भवार्णव इव त्वमभूर्विपन्नः
   त्रातो भवान् हनुमता भवतेव जन्तुः ॥

—विद्वान् जग्गु शिङ्गरार्यः, तुमकूरु

## जटायुः

दुर्वृत्तं जनकात्मजां प्ररुदतीं हृत्वा नयन्तं बलात्
व्योम्न्यालोक्य दशाननं तरुतले तिष्ठन् जटायुः क्रुधा ।
रुध्वा तं स्वविनाशमप्यगणयन् युध्वा च तेनान्ततः
तत्खड्गेन निषूदितस्पमपतत् भक्ताग्रणी राघवे ॥

लब्ध्वा पुत्रतया हरिं दशरथो रामं किमासीत्सुखी
तद्विश्लेषशुचा मृतश्च तनयाद्रामान्न दग्धोऽग्निना ।
युध्वासौ दशकन्धरेण निहतः पक्षी जटायुः परं
साक्षात् रामकराग्निसंस्करणतो मोक्षं ययौ तत्क्षणम् ॥

## काव्यकलापविचारः

त्यक्त्वान्यकार्याणि कुतूहलेन
श्लोकावलोकैकमना विपश्चित् ।
यस्मिंस्तु काव्ये रमते रसज्ञः
काव्यं तदेवास्य कविस्स एव ॥

विद्वत्प्रेमपदं चमत्कृतिपदं दिव्यं हरेः कीर्तनात्
भव्यं कीर्तिकरं मनुष्यजनुषः साफल्यसंपादकम् ।
मात्सर्यान्धधियामरुन्तुदमपि प्रेयोभिलाषास्पदं
सत्काव्यं रचयन् कलापमिव यत् धन्योऽस्म्यनन्योत्सवः

—विद्वान् जग्गु शिङ्गरार्यः, तुमकूरु

# अनेन कविना विरचितानि मुद्रितानि च
# अन्यानि काव्यानि

१. यदुशैलचम्पूः

२. दाशरथिचरितम्

३. वेङ्कटेशपदावलम्बस्तोत्रम्

४. शिबिवैभवं नाम नाटकम्

५. अतिमानुषस्तवः

६. काव्यकलापः प्रथमभागः

---

*For copies write to :*

Smt. YADUGIRI
No. 4, First Cross, Grape Garden
III Block, Thyagarajanagar, Bangalore 560 028